This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M729 विषय पंचिक

नाव. पंचत्व आरण्यक (अपूर्ण)

लेखक/लिपीकार —

पृष्ठ 28 काळ सन 1986 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(अरणें)

॥ ऐतरेयारण्यकप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐनमःश्रीवेदपुरुषाय ॥ हरिःॐ३म् ॥ भूमिमुपस्पृशेदग्नइळानमऽइळानमऽऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमो
वोऽअस्तुदेवेभ्यःशिवानःशंतमाभवसुमृळीकासरस्वतिमातेव्योमसंदृशि ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमा
क्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ १ ॥ शंनऽइंद्राग्नीभवतामवोभिःशंनऽइंद्रावरु
णारातहव्या ॥ शमिंद्रासोमासुवितायशंयोःशंनऽइंद्रापूषणावाजसातौ ॥ २ ॥ स्तुषेजनंसुव्रतंनव्यसीभिर्गीर्भिर्मि
त्रावरुणासुम्नयंता ॥ तऽआगमंतुतऽइहश्रुवंतुसुक्षत्रासोवरुणोमित्रोऽअग्निः ॥ ३ ॥ कयानश्चित्रऽआभुवदूतीसदावृ
धःसखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः ॥ दृढाचिदारुजेवसु ॥ ५ ॥
अभीषुणःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभिः ॥ ६ ॥ स्योनापृथिविभवानृक्षरानिवेशनी ॥ यच्छानः
शर्मसप्रथः ॥ ७ ॥ शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा ॥ शंनऽइंद्रोबृहस्पतिःशंनोविष्णुरुरुक्रमः ॥ ८ ॥ ओष्ठा
पिधानानकुलीदंतैःपरिवृतापविः ॥ सर्वस्यैवाचऽईशानाचारुमामिहवादयेदितिवाग्रसः ॥ ९ ॥ आवदंस्त्वं
शंकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः ॥ यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराः ॥ उदि
तःशुक्रियंदधे ॥ तमहमात्मनिदधे ॥ अनुमामैत्विंद्रियं ॥ मयिश्रीर्मयियशः ॥ सर्वैःसप्राणःसबलः ॥ उत्तिष्ठाम्यनुमा
श्रीः ॥ उत्तिष्ठत्वनुमायंतुदेवताः ॥ अदब्धंचक्षुरिषितंमनः ॥ सूर्योज्योतिषांश्रेष्ठोदीक्षेमामाहिंसीः ॥ तच्चक्षुर्देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंतंशुक्रमुच्चरत् ॥ पश्येमशरदःशतंजीवेमशरदःशतं ॥ त्वमग्नेरुद्रोऽअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षऽईशिषे ॥
त्वंवातैररुणैर्यासिशंगयस्त्वंपूषाविधतःपासिनुत्मना ॥ भद्रंनोअपिवातयमनः ॥ ॥ वाङ्मेमनसिप्रतिष्ठितामनोमेवा
चिप्रतिष्ठितमाविरावीर्मएधि ॥ वेदस्यमऽआणीस्थःश्रुतंमेमाप्रहासीरनेनाधीतेनाहोरात्रान्त्संदधाम्यृतंवदिष्यामिस
त्यंवदिष्यामितन्मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारँ ॥ ॐ शांतिःशांतिःशांतिः ॥ ॥
हरिःॐ३म्॥ अथमहाव्रतमिंद्रोवैवृत्रंहत्वामहानभवद्यन्महानभवत्तन्महाव्रतमभवत्तन्महाव्रतस्यमहाव्रतत्वंद्वेएतस्या
ह्वआज्येकुर्यादितिहैकऽआहुरेकमितित्वेवस्थितंप्रवोदेवायाग्नयइतिराद्धिकामोविशोविशोवोअतिथिमितिपुष्टिकामः
पुष्टिर्वैविशःपुष्टिमान्भवतीत्यतिथिमितिपदंभवतिनैतत्कुर्यादित्याहुरीश्वरोऽतिथिरेवचरितोस्तदुहस्माऽहकुर्यादेवयो
वैभवतियःश्रेष्ठतामश्नुतेसवाअतिथिर्भवतिनवाअसंतमातिथ्यायाद्रियंतेतस्मादुकाममेवैतत्कुर्यात्सयद्येतत्कुर्यादाग
न्मवृत्रहंतमग्निमित्येतंतृचंप्रथमंकुर्यादेतद्वाअहरीप्संतःसंवत्सरमासतेतआगच्छंतितएतेनुष्टुप्शीर्षाणस्त्रयस्तृचाभवंति
ब्रह्मवैगायत्रीवागनुष्टुप्ब्रह्मणैवतद्वाचंसंदधात्यबोध्यग्निःसमिधाजनानामितिकीर्तिकामोहोताजनिष्टचेतनइतिप्रजा
पशुकामः ॥ १ ॥ अग्निंनरोदीधितिभिररण्योरित्यन्नाद्यकामोग्निर्वाअन्नादश्चिरतरमिववाइतरेष्वाज्येष्वग्निमागच्छं
त्यथेहमुखतएवाग्निमागच्छंतिमुखतोन्नाद्यमश्नुतेमुखतःपाप्मानमपघ्नतेहस्तच्युतीजनयंतेतिजातवदेतस्माद्वाअह्नोय

जमानोजायतेतस्माज्जातवत्तानिचत्वारिछंदांसिभवंतिचतुष्पादावैपशवःपशूनामवरुध्यैतानित्रीणिच्छंदांसिभवंति
त्रयोवाइमेत्रिवृतोलोकाएषामेवलोकानामभिजित्यैतेद्वेछंदसीभवतःप्रतिष्ठायाएवद्विप्रतिष्ठोवैपुरुषश्चतुष्पादाःपश
वोयजमानमेवतद्विप्रतिष्ठंचतुष्पात्सुपशुषुप्रतिष्ठापयतिताःपराग्वचनेनपंचविंशतिर्भवंतिपंचविंशोयंपुरुषोदशहस्त्या
अंगुलयोदशपाद्याद्वाऊरूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेथोपंचविंशंवाएतदहःपंचविंशएत
स्याह्नस्तोमस्तत्समेनसमंप्रतिपद्यतेतस्माद्वेएवपंचविंशतिर्भवंतितास्त्रिःप्रथमयात्रिरुत्तमयैकयानत्रिंशद्यूनाक्षराविरा
ण्न्यूनेवैरेतःसिच्यतेन्यूनेप्राणान्यूनेन्नाद्यंप्रतिष्ठितमेतेषांकामानामवरुध्यैएतान्कामानवरुंधेयएवंवेदताअभिसंपद्य
तेबृहतींचविराजंचच्छंदोयैतस्याह्नःसंपत्तामथोअनुष्टुभमनुष्टुबायतनानिह्याज्यानि ॥ २ ॥ गायत्रंप्रउगंकुर्यादित्या
हुस्तेजोवैब्रह्मवर्चसंगायत्रीतेजस्वीब्रह्मवर्चसीभवतीत्यौष्णिहंप्रउगंकुर्यादित्याहुरायुर्वाऽउष्णिगायुष्मान्भवतीत्यानु
ष्टुभंप्रउगंकुर्यादित्याहुःक्षत्रंवाअनुष्टुप्क्षत्रस्याप्त्याइतिबार्हतंप्रउगंकुर्यादित्याहुःश्रीर्वैबृहतीश्रीमान्भवतीतिपांक्तंप्रउगं
कुर्यादित्याहुरन्नंवैपंक्तिरन्नवान्भवतीतित्रैष्टुभंप्रउगंकुर्यादित्याहुर्वीर्यंवैत्रिष्टुप्वीर्यवान्भवतीतिजागतंप्रउगंकुर्यादि
त्याहुर्जागतावैपशवःपशुमान्भवतीतिंतदुगायत्रमेवकुर्याद्ब्रह्मवैगायत्रीब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यतेतदुमाधुच्छं
दसँमधुहस्मवाऋषिभ्योमधुच्छंदाश्छंदसांमधुच्छंदसोमधुच्छंदस्त्वमथोऽअन्नंवैमधुसर्ववैमधुसर्ववैकामामधुतद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्माधुच्छंदसंशंसतिसर्वेषांकामानामवरुध्यैसर्वान्कामानवरुंधेयएवंवेदतद्वैकाहिकंरूपसमृद्धंबहुवाएतस्मिन्नहनिकिंचकिंचवारणंक्रियतेशांत्याएवशांतिर्वैप्रतिष्ठैकाहःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिं ॥ ३ ॥ वायवायाहिदर्शतेमेसोमाअरंकृताइत्येतद्वाअहररैयजमानायचदेवेभ्यश्चारंहास्माएतदहर्भवतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतींद्रवायूइमेसुताआयातमुपनिष्कृतमितियद्वैनिष्कृतैतत्संस्कृतमाहास्यैंद्रवायूसंस्कृतैंगच्छतोयएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिमित्रंहुवेपूतदक्षैधियंघृताचींसाधंतेतिवाग्वैधीर्घृताचीवाचमेवास्मिंस्तद्दधातियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसत्यश्विनायज्वरीरिषइत्यन्नंवाऽइषोऽन्नाद्यस्यावरुध्याआयातंरुद्रवर्तनीइत्याहास्याश्विनौयज्ञंगच्छतोयएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतींद्रायाहिचित्रभानविंद्रायाहिधियेषितइंद्रायाहितूतुजानइत्यायाह्यायाहीतिशंसत्याहास्येंद्रोयज्ञंगच्छतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसत्योमासश्चर्षणीधृतोविश्वेदेवासआगतेत्याहास्यविश्वेदेवाहवंगच्छंतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिदाश्वांसोदाशुषःसुतमितियदाहददुषोददुषःसुतमित्येवतदाहददतिहास्मैतंकामंदेवायत्कामएतच्छंसतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिपावकानःसरस्वतीयज्ञंवष्टुधियावसुरितिवाग्वैधियावसुर्वाचमेवास्मिंस्तद्दधातियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतियज्ञंवष्ट्वितियदाहयज्ञंवहत्वित्येवतदाहताःपराग्वचनेनैकविंशतिर्भवंत्येकविंशोऽयंपुरुषोदशहस्त्याअं

गुलयोदशपाद्याआत्मैकविंशस्तमिममात्मानमेकविंशंसंस्कुरुतेतास्त्रिःप्रथमयात्रिरुत्तमयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुलयोदशपाद्याद्वाऊरूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेथोपंचविंशंवाएतदहःपंचविंशएतस्याह्नःस्तोमस्तत्समेनसमंप्रतिपद्यतेतस्माद्वेएवपंचविंशतिर्भवंतिभवंतिं ॥४॥ इति प्रथमारण्यकेप्रथमोऽध्यायः ॥ १ ॥ ॥ आत्वारथंयथोतयइदंवसोसुतमंधइतिमरुत्वतीयस्यप्रतिपदनुचरावैकाहिकौरूपसमृद्धौबहुवाएतस्मिन्नहनिकिंचकिंचवारणंक्रियतेशांत्याएवशांतिर्वैप्रतिष्ठैकाहःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतींद्रनेदीयएदिहिप्रसूतिराशचीभिर्येतउक्थिनइत्युक्थंवाएतदहरुक्थवद्रूपसमृद्धंमेतस्याह्नोरूपंप्रैतुब्रह्मणस्पतिरच्छावीरमितिवीरवद्रूपसमृद्धंमेतस्याह्नोरूपंमुत्तिष्ठब्रह्मणस्पतेसुवीर्यमितिवीर्यवद्रूपसमृद्धंमेतस्याह्नोरूपंप्रनूनंब्रह्मणस्पतिर्मंत्रंवदत्युक्थ्यमित्युक्थंवाएतदहरुक्थवद्रूपसमृद्धंमेतस्याह्नोरूपमग्निर्नेतासवृत्रहेतिवार्त्रघ्नमिंद्ररूपमैंद्रमेतदहरेतस्याह्नोरूपंत्वंसोमक्रतुभिःसुक्रतुर्भूस्त्वंवृषावृषत्वेभिर्महित्वेतिवृषण्वद्वाइंद्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपंपिन्वंत्यपोत्यन्नमिहेविनयंतिवाजिनमितिवाजिमद्वाइंद्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपमथोउत्संदुहंतिस्तनयंतमक्षितमितिस्तनयद्वाइंद्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपंप्रवइंद्रायबृहतइतियद्वैबृहत्तन्महन्महद्वद्रूपसमृद्धंमेतस्याह्नोरूपंबृहदिंद्रायगायतेतियद्वैबृहत्तन्महन्महद्वद्रूपसमृद्धंमेतस्याह्नोरूपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकिःसुदासोरथंपर्यासनरीरमदितिंपर्यस्तवद्रांतिमद्रूपसमृद्धंमेतस्याह्नोरूपँसर्वान्प्रगाथान्छंसतिंसर्वेषामह्नामाप्त्यैस र्वेषामुक्थानाँसर्वेषांपृष्ठानाँसर्वेषांशस्त्राणाँसर्वेषांप्रउगाणाँसर्वेषांसवनानाँ ॥ ५ ॥ असत्सुमेजरितःसाभिवेगः सत्यध्वृतमितिशंसतिंसत्यंवाएतदहंःसत्यवद्रूपसमृद्धंमेतस्याह्नोरूपँतदुवासुक्रंब्रह्मवैवसुक्रोंब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्र तिपद्यतेंतदाहुरथकस्माद्वासुक्रेणैतन्मरुत्वतीयंप्रतिपद्यतइतिंनहवाएतदन्योवसुक्रान्मरुत्वतीयंमुदयच्छन्नविव्याचै तिंतस्माद्वासुक्रेणैवैतंन्मरुत्वतीयंप्रतिपद्यतेंतदनिरुक्तंप्राजापत्यंशंसत्यनिरुक्तोवैप्रजापतिंःप्रजापतेराप्त्यैसकृदिंद्रंनि राहंतेनैंद्राद्रूपान्नप्रच्यवतेंपिबासोममभियमुग्रतर्दइतिशंसत्यूर्वगव्यंमहिगृणानइंद्रेतिंमहद्वद्रूपसमृद्धमेतस्याह्नोरूपँत दुभारद्वाजंभरद्वाजोहवाऋषीणांमनूचानतमोदीर्घजीवितमंस्तपस्वितमआसंसएतेनसूक्तेनपाप्मानमपाहंततद्यद्भार द्वाजंशंसतिंपाप्मनोपहत्यांअनूचानोदीर्घजीवींतपस्व्यसानीतिंतस्माद्भारद्वाजंशंसतिंकयाशुभासवयसःसनीळाइति शंसंत्याशासतेप्रतिहर्यंत्युक्थैंत्युक्थंवाएतदहंरुक्थवद्रूपसमृद्धंमेतस्याह्नोरूपँतदुकयाशुभीयंमेतद्वैसंज्ञानंसंतनिसूक्तं यत्कयाशुभीयंमेतेनहवाइंद्रोगस्त्योमरुतंस्तेसमजानततंद्यत्कयाशुभीयंशंसतिंसंज्ञात्याएवतद्वायुष्यँतद्योस्यप्रियःस्यां त्कुर्यादेवास्यकयाशुभीयँमरुत्वाँइंद्रवृषभोरणायेतिशंसतींद्रवृषभइतिंवृषण्वद्वाइंद्रस्यरूपंमैंद्रमेतदहरेतस्याह्नोरूपँतदु वैश्वामित्रंविश्वस्यहवैमित्रँविश्वामित्रआसंविश्वंहास्मैमित्रंभवतियएवंवेदंयेषांचैवंविद्वानेतद्धोताशंसतिंजनिष्ठाउग्रः

सहसेतुरायेतिंनिविद्धानमैकाहिकंरूपसमृद्धंबहुवाएतस्मिन्नहंनिकिंचकिंचवारणंक्रियतेंशांत्याएवशांतिर्वैंप्रतिष्ठैकाहंः शांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिंप्रतितिष्ठतियएवंवेदंयेषांचैवंविद्वानेतद्धोताशंसतिंताःपराग्वचनेनंसप्तनव तिर्भवंतिंसायानवतिस्तिस्रस्तांस्त्रिंशिन्योविराजोथयाःसप्तातियंतिंयैवैषाप्रशंसासाह्यस्यंतस्याएवतास्त्रिंःप्रथमयांत्रि रुत्तमयैकशतंभवंतिंपंचांगुलयश्चतुष्पर्वांद्वेकक्षसीदोश्चाक्षश्चांसफलकंचंसापंचविंशतिंःपंचविंशानीतराणिह्यंगानिंत च्छतमात्मैकशततमोंयच्छतंतदायुंरिंद्रियंवीर्यंतेजोंयजमानएकशततमंआयुषींद्रियेवीर्यैंतेजसिप्रतिष्ठितंस्तास्त्रिष्टुभम भिसंपद्यंतेंत्रैष्टुभोहिमध्यंदिनंः ॥ ६ ॥ तदाहुःकिंप्रेंखस्यप्रेंखत्वमितियंवैप्रेंखोयोयंपवतंएषह्येषुलोकेषुप्रेंखतइतितत्प्रें खस्यप्रेंखत्वंमेकंफलकंस्यादित्याहुंरेकधाह्येवायंवायुःपवतेंस्यरूपेणेतितत्त्रिधादत्यँत्रीणिफलकानिस्युरित्याहुंस्त्रयोवाऽ इमेत्रिवृतोलोकांएषांरूपेणेतितत्त्रिधादत्यँद्वेएवस्यातांद्वौवाइमौलोकांवद्धातमाविवदृश्येतेंयउएनेअंतरेणाकाशंःसोंत रिक्षलोकंस्तस्माद्वेएवस्यातांमौदुंबरेस्यातांमूर्ग्वाअन्नाद्यमुदुंबरंऊर्जोन्नाद्यस्यावरुध्यैंमध्यतउद्धृतेस्यातांमध्यतोवैप्रजा अन्नंधिनोतिंमध्यतएवतदन्नाद्यस्ययजमानंदधात्युभय्योरज्जवोभवंतिंदक्षिणाश्चसव्याश्चदंक्षिणावाएकेषांपशूनाँरज्ज वःसव्याएकेषांतद्यदुभय्योरज्जवोभवैंत्युभयेषांपशूनामाप्त्यैदार्भ्यःस्युर्दर्भोवाऽओषधीनामपहतपाप्मांतस्माद्दार्भ्यः स्युंः॥७॥अरत्निमात्रउपरिभूमेंःप्रेंखःस्यादित्याहुंरेतावतावैस्वर्गालोकांःसंमिताइतितत्त्रिधादत्यँप्रादेशमात्रेस्यादित्याहुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेतावतावैप्राणाःसंमिताइतिंतत्तन्नाद॒त्यँमुष्टिमात्रेस्यादेतावतावैसर्वमन्नाद्यंक्रिय॑तएतावतासर्वमन्नाद्यमभिपन्नँतस्मा
न्मुष्टिमात्रएवस्यात्पुरस्तात्प्रत्यंचंप्रेंख॑मधिरोहेदित्याहु॑रेतस्यरूपेणयएषतपति॑पुरस्ताद्ध्येषइमाँल्लोका॑न्प्रत्यङ्धिरोहती
तितत्तन्नाद॒त्यँतिर्यंचमधिरोहेदित्याहु॑स्तिर्यंचंवाअश्वमधिरोहांतिंतेनोसर्वान्कामानवाप्नवामेतिं॑तत्तन्नाद॒त्यम॑न्वंचमधि
रोहेदित्याहु॑रनूचींवैनावमधिरोहांतिंनौर्वैषास्वर्गयाणीयत्प्रेंखइतितस्मादन्वंचमेवाधिरोहे॑च्छुबुकेनोपस्पृशे॑च्छुबुकोहै
वंवृक्षमधिरोहति॑सउवयसामन्नादतमइतिं॑तस्माच्छुबुकेनोपस्पृशे॑द्बाहुभ्यामधिरोहे॑देवंश्येनोवयांस्यभिनिविशत॑एवंवृ
क्षंसउवयसा॑वीर्यवत्तमइतिं॑तस्माद्बाहुभ्यामधिरोहे॑दस्यैपादंनोच्छिद्या॑न्नेदस्यैप्रतिष्ठायाऽउच्छिद्याइतिं॑प्रेंखंहोताधिरो
ह॑त्यौदुंबरीमासंदीमुद्गा॑तावृषावैप्रेंखोयोषासंदी॑तन्मिथुनंमिथुनमेवत॑दुक्थमुखेकरोति॑प्रजात्यैप्रजायते॑प्रजयापशुभिर्य
एवंवेदा॑थान्नंवैप्रेंखःश्रीरासंद्यन्नंचैवत॑च्छ्रियंचान्वधिरोहतोबृसीर्होत्रका॑ःसमधिरोहांतिंसब्रह्मका॑ःसमुत्सृप्यवा॑ओषधि
वनस्पतयःफलंगृह्णांतिंतद्यदेतस्मिन्नहनिसर्वशः॑समधिरोहंतीषमेवतदूर्जमन्नाद्यमधिरोह॑त्यूर्जोऽन्नाद्यस्यावरुध्यैवषट्कृ
त्यावरोहेदित्याहु॑स्तत्तन्नाद॒त्यमकृतावैसापचिति॑र्यामपश्यतेकरोति॑निगृह्यभक्षमवरोहेदित्याहु॑स्तत्तन्नाद॒त्यमकृतावैसा
पचिति॑र्यामध्यृष्टायकरोति॑प्रतिख्यायभक्षमवरोहे॑देषावाअपचिति॑र्यांपश्यतेकरोति॑तस्मात्प्रतिख्यायैवभक्षमवरोहे॑त्प्रा
ङ्वरोहे॑त्प्राग्वैदे॑वरे॑तः॑संप्रजायते॑तस्मात्प्राङ्वरोहे॑देवरोहेत् ॥८॥ इतिद्वितीयोध्यायः ॥ २ ॥ ॥ हिंकारेणैतदहःप्रति

१ रेतसमितिपाठः ।

पद्यतेत्याहु॑र्ब्रह्मवैहिंकारो॑ब्रह्मैवतदहर्ब्रह्मणैवत॑द्ब्रह्मप्रतिपद्यतेयएवंवेद॑यदेवहिंकारेणप्रतिपद्यता ३ ई ॥ वृषावैहिंकारो॑
योषर्कत॑न्मिथुनँमिथुनमेवतदुक्थमुखेकरोति॑प्रजात्यैप्रजायते॑प्रजयापशुभिर्यएवंवेद॑यद्वेवहिंकारेणप्रतिपद्यता ३ ई ॥
यथावाऽअभ्रिरेवँब्रह्मणोहिंकारो॑यद्वैकिंचाभ्रियाऽभिति॑तृत्सत्यभ्येवैनत्तृण॑त्त्येवंयंकामंकामयते॑हिंकारेणाभ्येवैनंतृण
त्तियएवंवेद॑यद्वेवहिंकारेणप्रतिपद्यता ३ ई ॥ वाचोवाऽएषाव्यावृत्तिर्दै॑व्यैचमानुष्यै॑चयद्धिंकारःसयद्धिंकृत्यप्रतिप
द्यते॑वाचमेवतद्व्यावर्तयति॑दैवीं॑चमानुषीं॑च ॥ ९ ॥ तदाहुःकैतस्याह्नःप्रतिपदि॑तिमनश्चवाक्चेतिब्रूयात्सर्वेन्यस्मिन्कामाः
श्रिता॑ःसर्वानन्यान्कामान्दुहे॑मनसिवैसर्वेकामाःश्रिता॑मनसाहिसर्वान्कामान्ध्याय॑तिसर्वेहास्मिन्कामाःश्रय॑तेयएवं
वेद॑वाग्वैसर्वान्कामान्दुहे॑वाचाहिसर्वान्कामान्वद॑तिसर्वान्हास्मैकामान्वाग्दुहेयएवंवेद॑तदाहुर्नै॑तदह॑र्ऋचानयजुषान
साम्ना॑प्रत्यक्षात्प्रतिपद्येत॑नर्चोनयजुषोनसाम्नइयादिति॑तदेताएवव्याहृती॑ःपुरस्ताज्जपे॑द्भूर्भुवःस्वरित्येतावावव्याहृतय॑
इमेत्रयोवेदाभूरित्येवऋग्वेदो॑भुवइतियजुर्वेदः॑स्वरितिसामवेद॑स्तन्नर्चानयजुषानसाम्ना॑प्रत्यक्षात्प्रतिपद्यते॑नर्चोनयजु
षोनसाम्नए॑ति ॥ १० ॥ तदितिप्रतिपद्यते॑तत्तदितिवाअन्नमन्नमेवत॑दभिप्रतिपद्यते॑एतांवावप्रजापति॑ःप्रथमांवाचं
व्याहरदे॑काक्षरद्व्यक्षरांततेतितातेति॑तथैवतत्कुमार॑ःप्रथमवादीवाचंव्याहरत्ये॑काक्षरद्व्यक्षरांततेतितातेति॑तयैवतत्तत
वत्यावाचाप्रतिपद्यते॑तदुक्तमृषिणाबृहस्पतेप्रथमंवाचोअग्रमि॑त्येतद्ध्येवप्रथमंवाचोअग्रँयत्प्रैरतनामधेयंदधानाइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचाहिनामधेयानिधीयंतैयदेषांश्रेष्ठंयदरिप्रमासीदित्येतद्ध्येवश्रेष्ठमेतदरिप्रंप्रेणातदेषांनिहितंगुहाविरितींदमुहगुहाध्यात्ममिमादेवताअदउआविरधिदैवतमित्येतत्तदुक्तंभवति ॥ ११ ॥ तदिदासभुवनेषुज्येष्ठमितिप्रतिपद्यतएतद्वावभुवनेषुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णइत्यतोह्येषजातउग्रस्त्वेषनृम्णंःसद्योजज्ञानोनिरिणातिशत्रूनितिसद्योह्येषजातःप्राप्मानमपाहतानुयंविश्वेमदंत्यूमाइतिभूतानिवैविश्वऊमास्तएनमनुमदंत्युदगादुदगादितिवावृधानःशवसाभूर्योजाइत्येषवैवावृधानःशवसाभूर्योजाइतिशत्रुर्दासायभियसंदधातीतिसर्वंह्येतस्माद्बीभाय्यनच्चव्यनच्चसस्नीतियच्चप्राणियच्चाप्राणकमित्येवतदाहसंतेनवंतप्रभृतामदेष्वितितवसर्ववशइत्येवतदाहत्वेक्रतुमपिवृंजंतिविश्वइतित्वयीमानिसर्वाणिभूतानिसर्वाणिमनांसिसर्वेक्रतवोपिवृंजंतीत्येवतदाहद्विर्यदेतेत्रिर्भवंत्यूमाइतिद्वौवैसंतौमिथुनौप्रजायेतैप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदस्वादोःस्वादीयःस्वादुनासृजासमितितिमिथुनंवैस्वादुप्रजास्वादुमिथुनेनैवतत्प्रजांसंसृजत्यदःसुमधुमधुनाभियोधीरितिमिथुनंवैमधुप्रजामधुमिथुनेनैवतत्प्रजामभियुध्यतितदुक्तमृषिणास्वांयत्तनूंतन्वामैरयतैत्यस्यांशारीर्यामिमांछंदोमयीमित्येवतदाहाथोतनूरेवतन्वोअस्तुभेषजमित्यस्यैशारीर्याइयंछंदोमयीत्येवतदाहतस्यैयान्यष्टावक्षराणिसागायत्रीयान्येकादशसात्रिष्टुप्यानिद्वादशसाजगत्यथयानिदशसाविराट्दशिन्येषुत्रिषुछंदःसुप्रतिष्ठितापुरुषइतित्र्यक्षरंसउविराज्येतानिवावसर्वाणिच्छंदांसियान्येतानिविराट्चतुर्थान्येवमुहैवैवंविदुषएतदहः

सर्वैश्छंदोभिःप्रतिपन्नंभवति ॥१२॥ तानदेनविहरतिपुरुषोवैनदस्तस्मात्पुरुषोतदंन्तर्सर्वःसन्नदतीवनदंवओदतीनामितीँ३आपोवाओदत्योयादिव्यास्ताहीदंसर्वमुदंत्यापोवाओदत्योयामुख्यास्ताहीदंसर्वमन्नाद्यमुंदंतिनदंयोयुवतीनामितीँ३आपोवावयोयुवत्योयाअंतरिक्ष्यास्ताहिपोप्लूयंतइवापोवावयोयुवत्योयाःस्वेदतेताहिंसरीसृप्यंतइवपतिंवोअघ्यानामितीँ३आपोवाअघ्याया अग्नेर्धूमाज्जायंतआपोवाअघ्यायाःशिश्नात्प्रसृज्यंतेधेनूनामिषुध्यसीतीँ३आपोवावधेनवस्ताहीदंसर्वंधिन्वंतीषुध्यसीतियदाहपतीयसीत्येवतदाहत्रिष्टुभंचानुष्टुभंचविहरतिवृषावैत्रिष्टुब्योषाऽनुष्टुप्तन्मिथुनंतस्मादपिपुरुषोजायांवित्वाकृत्स्नतरमिवाऽत्मानंमन्यतेतास्त्रिःप्रथमयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुलयोदशपाद्याद्बाऊरूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेथोपंचविंशंवाएतदहःपंचविंशएतस्याह्नःस्तोमस्तत्समेनसमंप्रतिपद्यतेतस्माद्वेएवपंचविंशतिर्भवंति ॥१३॥ तदितिप्रतिपद्यतेतत्तदितिवाअन्नमन्नमेवतदभिप्रतिपद्यतएतांवावप्रजापतिःप्रथमांवाचंव्याहरद्देकाक्षरद्व्यक्षरांततेतितातेतितथैवैतत्कुमारःप्रथमवादीवाचंव्याहरत्येकाक्षरद्व्यक्षरांततेतितातेतितयैवतत्ततवत्यावाचाप्रतिपद्यतेतदुक्तमृषिणाबृहस्पतेप्रथमंवाचोअग्रमित्येतद्ध्येवप्रथमंवाचोअग्रंयत्प्रैरतनामधेयंदधानाइतिवाचाहिनामधेयानिधीयतैयदेषांश्रेष्ठंयदरिप्रमासीदित्येतद्ध्येवश्रेष्ठमेतदरिप्रंप्रेणातदेषांनिहितंगुहाविरितींदमुहगुहाध्यात्ममिमादेवताअदउआविरधिदैवतमित्येतत्तदुक्तंभवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १४ ॥ तदिदासभुवनेषुज्येष्ठमितिंप्रतिपद्यतेयद्वैज्येष्ठंतन्महन्महद्ब्रह्मोपसमृद्धंमेतस्याह्नोरूपंतांसुतेकीर्तिंमघवन्महित्वेतिंमहद्ब्रह्मोपसमृद्धंमेतस्याह्नोरूपंभूयइद्धावृधेवीर्यायेतिंवीर्यवद्ब्रह्मोपसमृद्धंमेतस्याह्नोरूपंनृणामुत्वानृतमंगीर्भिरुक्थैरित्युक्थंवाएतदहरुक्थवद्ब्रह्मोपसमृद्धंमेतस्याह्नोरूपंन्यूनाक्षरेप्रथमेपदेविहरतिंन्यूनेवैरेतःसिच्यतेंन्यूनेप्राणान्यूनेऽन्नाद्यंप्रतिष्ठितंमेतेषांकामानामवरुध्यैएतान्कामानवरुंधेयएवंवेदद्वेदशाक्षरेभवतउभयोरन्नाद्ययोरुपाप्त्यैयच्चपद्यच्चापादकामित्यष्टादशाष्टादशाक्षराणिभवंतियानिदशनवप्राणाआत्मैवदशमंःसात्मनःसंस्कृतिरष्टावष्टाउद्यंतेंश्रुतेयद्यत्कामयतेयएवंवेदं ॥१५॥ तानदेनविहरतिंप्राणोवैनदंस्तस्मात्प्राणोनदंन्त्सर्वःसन्नदतीवनदंवओदतीनामितींऽउष्णिगक्षरैर्भवत्यनुष्टुप्पादैरायुर्वाउष्णिग्वागनुष्टुप्तदस्मिन्नायुश्चवाचंचदधातिंतास्त्रिःप्रथमयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुलयोंदशपाद्याद्वाऊरूद्वौबाहूंआत्मैवपंचविंशंस्तमिममात्मानंपंचविंशंसंस्कुरुतेंथोपंचविंशंवाएतदहंःपंचविंशएतस्याह्नःस्तोमंस्तत्समेनसमंप्रतिपद्यतेंतस्माद्वेएवपंचविंशतिर्भवंतीत्यध्यात्मंपंचविंशोऽथाधिदैवतंचक्षुःश्रोत्रंमनोवाक्प्राणंस्ताएताःपंचदेवताइमंविष्टाःपुरुषंपंचोहैवैतादेवताअयंविष्टंःपुरुषःसोत्रालोमभ्यआनखेभ्यंःसर्वःसांगआप्यतेंतस्मात्सर्वाणिभूतान्यापिपीलिकाभ्यंआद्यान्येवजायंतेंतदुक्तमृषिणासहस्रधापंचदशान्युक्थेतिंपंचहिदशतोभवंतियावद्ध्यावापृथिवीतावदित्तदितियावतीवैद्यावापृथिवीतावानात्मासहस्रधामहिग्नानः

सहस्रमितिंत्युक्थान्येवतदनुमदतिमहयतियावद्ब्रह्मविष्ठितंतावतीवागितियत्रहक्कचब्रह्मतद्वांग्यत्रवावाक्तद्वाब्रह्मेत्येत्तदुक्तंभवंत्येषांवाएषांसूक्तानांनवर्त्रंप्रथमंनववैप्राणांःप्राणानांकृत्स्नैषळृचंभवंतिषड्वाऋतवऋतूनामाप्त्यैपंचर्चंभवंतिपंचपदापंक्तिंःपंक्तिर्वाअन्नमन्नाद्यस्यावरुध्यैतृचोभवंतित्रयोवाइमेत्रिवृतोलोकांएषामेवलोकानामभिजित्यैताअभिसंपद्यंतेंबृहतींछंदोमृतंदेवलोकंमेषआत्मैवमुहैवैवंविदेंतयैवसंपदांमृतमेवात्मानमभिसंभवतिसंभवति ॥ १६ ॥ इतिप्रथमारण्यकेतृतीयोध्यायः ॥३॥ ॥ अथसूददोहाःप्राणोवैसूददोहांःप्राणेनपर्वाणिसंदधात्यथातोग्रीवास्ताआचक्षतेंयथाछंदसमुष्णिहइत्यंथसूददोहाःप्राणोवैसूददोहांःप्राणेनपर्वाणिसंदधात्यथातःशिरस्तद्गायत्रीषुभवंत्यग्रंवैछंदसांगायत्र्यग्रमंगानांशिरस्तदर्कवतीषुभवंत्यग्निर्वाअर्कस्तानवभवंतिनवकपालंवैशिरोंदशमींशंसतिंत्वक्केशाइत्येवसाभवंत्यथोस्तोमातिशंसनायाएवंतौत्रिवृच्चस्तोमौभवतोंगायत्रंचच्छंदंएतयोर्वैंस्तोमच्छंदसोंःप्रजातिमनुसर्वमिदंप्रजायतेयदिदंकिंचप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदांथसूददोहाःप्राणोवैसूददोहांःप्राणेनपर्वाणिसंदधात्यथातोविजवस्ताविराजोभवंतितस्मात्पुरुषःपुरुषमाहंविवाअस्मासुराजसि ॥ ग्रीवावैधारयसीतिंस्तभमानंवायद्वादुतांःसंबाह्वतमाःसत्योन्नतमांप्रत्यच्यंतेंऽन्नंहिविराळन्नमुवीर्यैमथसूददोहाःप्राणोवैसूददोहांःप्राणेनपर्वाणिसंदधाति ॥ १७ ॥ अथातोदक्षिणःपक्षःसोयंलोकःसोयमग्निंःसावाक्तद्रथंतरंसवसिष्ठंस्तच्छतंतानिषड्वीर्याणिभवंतिसंपातएवकामानामभ्याप्त्यैप्रतिष्ठित्याअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाद्यायपंक्तिर'थसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधात्य'थातउत्तरःपक्षःसोसौलोकःसोसावादित्यस्तन्मन
स्तद्बृहत्सभरद्वाजस्तच्छंतानिषड्वीर्याणिभवंतिसंपातएवकामानामभ्याप्त्यैप्रतिष्ठित्याअन्नाद्यायपंक्तिस्ताऊनातिरि
क्तौभवतोवृषावैबृहद्योषारथंतरंमतिरिक्तंवैपुंसोन्यूनंस्त्रियैतस्मादूनातिरिक्तौभवतोथोऽएकेनहवैपत्रेणसुपर्णस्योत्तरः
पक्षोज्यायांस्तस्मादेकयर्चोत्तरःपक्षोभूयान्भवत्यथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधात्यथातःपुच्छैताए
कविंशतिर्द्विपदाभवंत्येकविंशतिर्हीमानिप्रत्यंचिसुपर्णस्यपत्राणिभवंत्यथोएकविंशोवैस्तोमानांप्रतिष्ठाप्रतिष्ठापुच्छंवय
सांद्वाविंशींशंसतिप्रतिष्ठयोरेवतद्रूपंक्रियतेतस्मात्सर्वाणिवयांसिपुच्छेनप्रतितिष्ठंतिपुच्छेनैवप्रतिष्ठायोत्पतंतिप्रतिष्ठा
हिपुच्छैसएषद्वाभ्यांदशिनीभ्यांविराड्भ्यांमनयोर्द्वाविंश्योर्द्विपदयोरयंपुरुषःप्रतिष्ठितस्तस्ययत्सुपर्णरूपंतदस्यकामा
नामभ्याप्त्याअथयत्पुरुषरूपंतदस्यश्रियैयशसेन्नाद्यायापचित्याअथसूददोहाअथधाय्याथसूददोहावृषावैसूददोहा
योषाधाय्यातदुभयतःसूददोहसाधाय्यांपरिशंसतितस्माद्वयोरेतःसिक्तंसदेकतामेवाप्येतियोषामेवाभ्यतआजानाहि
योषातःप्रजानातस्मादेनामत्रशंसति ॥ १८ ॥ गायत्रींतृचाशीतिंशंसत्ययंवैलोकोगायत्रीतृचाशीतिर्यदेवास्मिँल्लोकेयशो
यन्महोयन्मिथुनंयदन्नाद्यंयापचितिंस्तदश्नवैतदाप्नवानि ॥ तदवरुणधैतन्मेसदित्यथसूददोहाःप्राणोवैसूददोहाःप्राणे

१ अत्रैतादृक्किङ्गर्भितोभागोनभाष्यकाराभिमतः ।

नेमंलोकंसंतनोतिबार्हतींतृचाशीतिंशंसत्यंतरिक्षलोकोवैबार्हतीतृचाशीतिर्यदेवांतरिक्षलोकेयशोयन्महोयन्मिथुनंय
दन्नाद्यंयापचितिंस्तदश्नवैतदाप्नवानि ॥ तदवरुणधैतन्मेसदित्यथसूददोहाःप्राणोवैसूददोहाःप्राणेनांतरिक्षलोकंसंत
नोत्यौष्णिहींतृचाशीतिंशंसत्यसौवैलोकोद्यौरौष्णिहीतृचाशीतिर्यदेवामुष्मिँल्लोकेयशोयन्महोयन्मिथुनंयदन्नाद्यंयाप
चितिर्यद्देवानांदैवंतदश्नवैतदाप्नवानि ॥ तदवरुणधैतन्मेसदित्यथसूददोहाःप्राणोवैसूददोहाःप्राणेनामुंलोकंसंतनोति
संतनोति॥१९॥इतिप्रथमारण्यकेचतुर्थोध्यायः ॥४॥ ॥ वशंशंसतिवशेमइदंसर्वमसदितिताएकविंशतिर्भवंत्येकविंश
तिर्हिताअंतरुदरेविकृतयोथोएकविंशोवैस्तोमानांप्रतिष्ठाप्रतिष्ठोदरमन्नाद्यानांताविच्छंदसोभवंतिविक्षुद्रमिववाअंत
स्त्यमणीयइवचस्थवीयइवचताःप्रणावंच्छंदस्कारैयथोपपादंशंसतियथोपपादमिववाअंतस्त्यंहसीयइवचद्राघीयइव
चाथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधातितामत्रोत्सृजतिद्वादशकृत्वःशस्त्वाद्वादशविधावाइमेप्राणाः
सप्तशीर्षण्याद्यौस्तन्यौत्रयोवांचोऽत्रवैप्राणाआप्यंतेत्रसंस्क्रियंतेतस्मादेनामत्रोत्सृजतीद्राग्नीयुवंसुनइत्यैंद्राग्नाऊरूउर्व
ष्ठीवेप्रतिष्ठेताःषट्पदाभवंतिप्रतिष्ठायाएवंद्विप्रतिष्ठोवैपुरुषश्चतुष्पादाःपशवोयजमानमेवतद्विप्रतिष्ठंचतुष्पात्सुपशुषु
प्रतिष्ठापयतिद्वितीयासप्तपदाभवतितांगायत्रींचानुष्टुभंचकरोतिब्रह्मवैगायत्रीवागनुष्टुप्ब्रह्मणैवतद्वाचंसंदधातित्रि
ष्टुभमंततःशंसतिवीर्यवैत्रिष्टुब्वीर्येणैवतत्पशून्परिगच्छतितस्मात्पशवोवीर्यमनूपतिष्ठंतईर्यतांचैवाभ्युत्थानंच ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवोमहेमंदमानायांधसइत्यैंद्रेनिष्केवल्येनिविदंदधातिप्रत्यक्षाद्ध्येवतदात्मन्वीर्यंधत्तेतास्त्रिष्टुब्जगत्योभवंतितदाहुर थकस्मात्त्रिष्टुप्जगतीषुनिविदंदधातीतिंनहवाएतस्याह्नएकंछंदोनिविदंदाधारनविव्याचेतितस्मात्त्रिष्टुप्जगतीषुनिवि दंदधातितदेतदहस्त्रिनिवित्कंविद्याद्वशोनिविद्वालखिल्यानिर्विन्निविदेवनिविदेवमेनंत्रिनिवित्कंविद्यादथसूक्तेवनेन वायोन्यधायिचार्कन्योजातएवप्रथमोमनस्वानितितयोरस्त्यन्नेसमस्ययदसन्मनीषाइत्यन्नाद्यस्यावरुध्यैअथावपनमे तेंअंतरेणैन्द्रीणांदशतीनांत्रिष्टुब्जगतीनां'बृहंती'संपन्नानांयावतीरावपंतेतावंत्यूर्ध्वमायुषोवर्षाणिजीवंत्येतेनहैवावप नेनायुराप्यतेप्रजांमेपशवोर्जयन्नित्येवंसजनीयमनुशंसतिंतार्क्ष्यंशंसतिंस्वस्त्ययनंवैतार्क्ष्यैःस्वस्तितायैस्वस्त्ययनमेवत त्कुरुतएकपदांशंसत्येकधेदंसर्वमसानीत्यथोसर्वाच्छंदस्कृतिमाप्नवानीतींद्रंविश्वाअवीवृधन्नितिपदानुषंगास्ताःसप्ता नुषजतिंसप्तवैशीर्षन्प्राणाःशीर्षन्नेवतत्प्राणान्दधात्यष्टमींनानुषजतिवागष्टमीनेन्मेवाक्प्राणैरनुषक्तासदितितस्मादु सावाक्समानायतनाप्राणैःसत्यननुषक्तांविराजःशंसत्यन्नंवैविराजोन्नाद्यस्यावरुध्यैवासिष्ठेनपरिदधातिवसिष्ठोसानीं त्येषस्तोमोमहउग्रायवाहइतिंमहद्भत्यारूपसमृद्ध्यांधुरीवात्योनवाजयन्नधायीत्यंतोवैधूरंतएतदहरेतस्याह्नोरूपंमिंद्र त्वायमर्कईट्टेवसूनामित्यर्कवत्यारूपसमृद्ध्यांदिवीवद्यामधिनःश्रोमतंधाइतियत्रहक्चब्रह्मण्यावागुद्यतेतद्धास्यकी

१ अत्रबृहतीशब्दपाठोनभाष्यकारेष्टः ।

र्तिर्भवतियत्रैवंविद्वानेतयापरिदधातितस्मादेवंविद्वानेतयैवपरिदध्यात् ॥२१॥ तत्सवितुर्वृणीमहेंऽद्यानोदेवसवितरि तिवैश्वदेवस्यप्रतिपदनुचरावैकाहिकौरूपसमृद्धौबहुवाएतस्मिन्नहर्निकिंचकिंचवारणंक्रियतेशांत्याएवशांतिर्वैप्रतिष्ठै काह्नःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतितद्देवस्यसवितुर्वार्यं महदितिसावित्रंमंतोवैमहदंतएतदहरेतस्याह्नोरूपंकतरापूर्वाकतरापरायोरितिद्यावापृथिवीयंसमानोदर्कंसमानोदर्क वाएतदहरेतस्याह्नोरूपंमनश्चोजातोअनभीशुरुक्थ्यइत्यार्भवंरथस्त्रिचक्रइतिय(प)देतत्त्रिवत्तदंतोवैत्रिवदंतएतदहरे तस्याह्नोरूपंमस्यवामस्यपलितस्यहोतुरितिवैश्वदेवंबहुरूपंवाएतदहरेतस्याह्नोरूपंगौरीर्मिमायसलिलानितक्षतीत्येतदं तंमानोभद्राःक्रतवोयंतुविश्वतइतिवैश्वदेवंनिविद्धानमैकाहिकंरूपसमृद्धंबहुवाएतस्मिन्नहर्निकिंचकिंचवारणंक्रियते शांत्याएवशांतिर्वैप्रतिष्ठैकाह्नःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशं सतिंवैश्वानरायधिषणामृतावृधइत्याग्निमारुतस्यप्रतिपदंतोवैधिषणांतंएतदहरेतस्याह्नोरूपंप्रयज्यवोमरुतोभ्राजदृष्ट यइतिमारुतंसमानोदर्कंसमानोदर्कवाएतदहरेतस्याह्नोरूपंजातवेदसेसुनवामसोममितिजातवेदस्यांपुरस्तात्सूक्तस्यशं सतिंस्वस्त्ययनंवैजातवेदस्याःस्वस्तितायैस्वस्त्ययनमेवतत्कुरुतइमंस्तोममर्हतेजातवेदसइतिजातवेदस्यंसमानोदर्कंस मानोदर्कंवाएतदहरेतस्याह्नोरूपमह्नोरूपं॥२२॥ इतिप्रथमारण्यकेपंचमोध्यायः ॥५॥ इतिऐतरेयकेप्रथमारण्यकंस०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिःॐम् ॥ एषपंथाएतत्कर्मैतद्ब्रह्मैतत्सत्यंतस्मान्नप्रमाद्येत्तन्नातीयान्नह्यत्रायन्पूर्वैर्येत्यायंस्तेपराबभूवुस्तदुक्तमृषिणाप्रजाहतिस्रोअत्यायमीयुर्न्य१न्याअर्कमभितोविविश्रे ॥ बृहद्धतस्थौभुवनेष्वंतःपवमानोहरितआविवेशेतिप्रजाहतिस्रोअत्यायमीयुरितियावैताइमाःप्रजास्तिस्रोअत्यायमायंस्तानीमानिवयांसिवंगावगधाश्चेरपादान्य१न्याअर्कमभितोविविश्रइतिताइमाःप्रजाअर्कमभितोनिविष्टाइममेवाग्निंबृहद्धतस्थौभुवनेष्वंतरित्यदउएवबृहद्धुवनेष्वंतरसावादित्यःपवमानोहरितआविवेशेतिवायुरेवपवमानोदिशोहरितआविष्टः ॥ १ ॥ उक्थमुक्थमितिवैप्रजावदंतितदिदमेवोक्थमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंचतस्याग्निरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेन्तरिक्षमेवोक्थमंतरिक्षंवाअनुपतैत्यंतरिक्षमनुधावयंतितस्यवायुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेसावेवद्यौरुक्थममुतःप्रदानाद्धीदंसर्वमुत्तिष्ठतियदिदंकिंचतस्यासावादित्योर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतइत्यधिदैवतमथाध्यात्मंपुरुषएवोक्थमयमेवमहान्प्रजापतिरहमुक्थमस्मीतिविद्यात्तस्यमुखमेवोक्थंयथापृथिवीतथातस्यवागर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेनासिकेएवोक्थंयथांतरिक्षंतथातस्यप्राणोर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेतदेतद्ब्रह्मस्यविष्टपंयदेतन्नासिकायैविनतमिवललाटमेवोक्थंयथाद्यौस्तथातस्यचक्षुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेसमानमशीतयोध्यात्मंचाधिदैवतंचान्नमेवान्नेनहीमानिसर्वाणिभूतानिसमनंतीँ३ ॥ अन्नेनमंलोकंजयत्यन्नेनामुंतस्मात्समानमशीतयोध्यात्मंचाधिदैवतं

चान्नमेवतदिदमन्नमन्नादमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंचयद्धकिंचेदंप्रेर्ता३इ ॥ तदसौसर्वमत्तियदुकिंचात्तःप्रैतीँ३ ॥ तदियंसर्वमत्तिसेयमित्याद्याऽयत्ताहवाआद्योभवतिंनतस्येशेयंनाद्याद्यद्धैनंनाद्युः ॥ २ ॥ अथातोरेतसःसृष्टिःप्रजापतेरेतोदेवादेवानांरेतोवर्षंवर्षस्यरेतओषध्यओषधीनांरेतोन्नमन्नस्यरेतोरेतोरेतसोरेतःप्रजाःप्रजानांरेतोहृदयंहृदयस्यरेतोमनोमनसोरेतोवाग्वाचोरेतःकर्म ॥ तदिदंकर्मकृतमयंपुरुषोब्रह्मणोलोकःसइरामयोयद्धीरामयस्तस्माद्धिरण्मयोहिरण्मयोहवाअमुष्मिँल्लोकेसंभवतिहिरण्मयःसर्वेभ्योभूतेभ्योदृश्यएवंवेद ॥ ३ ॥ तंप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंयत्प्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंतस्मात्प्रपदेतस्मात्प्रपदेइत्याचक्षतेशफाःखुराइत्यन्येषांपशूनांतदूर्ध्वमुदसर्पत्ताऊरूअभवतांमुरुगृणीहीत्यब्रवीत्तदुदरमभवद्दुर्वेवमेकुर्वित्यब्रवीत्तदुरोभवद्दुदरंब्रह्मेतिशार्कराक्ष्याउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्माहैवता३इ ॥ ऊर्ध्वत्वेवोदसर्पत्तच्छिरोश्रयतंयच्छिरोश्रयततच्छिरोभवत्तच्छिरसःशिरस्त्वैताएताःशीर्षञ्छ्रियःश्रिताश्चक्षुःश्रोत्रंमनोवाक्प्राणःश्रयंतेस्मिञ्छ्रयोयएवमेतच्छिरसःशिरस्त्वंवेदताअहिंसंताहमुक्थमस्म्यहमुक्थमस्मीतिताअब्रुवन्हंतास्माच्छरीरादुत्क्रामामतद्यस्मिन्नउत्क्रांतइदंशरीरंपत्स्यतितदुक्थंभविष्यतीतिवागुदक्रामदवदन्नश्नन्पिबन्नास्तैर्वचक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैर्वश्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैर्वमनउ

१ मनउत्क्रामन्निति भाष्यादृतःपाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्रामन्मीलितइवाश्नन्पिबन्नास्तैवप्राणउदक्रामत्तत्प्राणउत्क्रांतेपद्यतेतदशीर्यताशारीतीँ३ ॥ तच्छरीरमभवत्तच्छरीरस्यशरीरत्वँशीर्यतेहवाअस्यद्विषन्पाप्माभ्रातृव्यःपरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदताअहिंसंतैवाहमुक्थमस्म्यहमुक्थमस्मीतिताअब्रुवन्हंतेदंपुनःशरीरंप्रविशामतद्यस्मिन्नःप्रपन्नइदंशरीरमुत्थास्यतितदुक्थंभविष्यतीतिवाक्प्राविशदशयदेवचक्षुःप्राविशदशयदेवश्रोत्रंप्राविशदशयदेवमनःप्राविशदशयदेवप्राणःप्राविशत्तत्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभवत्तदेतदुक्थाँ३ ॥ प्राणएवप्राणउक्थमित्येवविद्यात्तंदेवाअब्रुवन्त्वमुक्थमसित्वमिदंसर्वमसितवयंस्मस्त्वमस्माकमसीतितदप्येतदृषिणोक्तँत्वमस्माकंतवस्मसीति ॥ ४ ॥ तंदेवाःप्राणयंतसप्रणीतःप्रातायतप्रातायीतीँ ३ ॥ तत्प्रातरभवत्समागादितीँ ३ ॥ तत्सायमभवदहरेवप्राणोरात्रिरपानोवागग्निश्चक्षुरसावादित्यश्चंद्रमामनोदिशःश्रोत्रंसएषप्रहिताँसंयोगोध्यात्ममिमादेवताअदउआविरधिदैवतमित्येतत्तदुक्तंभवत्येतद्धस्मवैतद्विद्वानार्हहिरण्यदन्बैदोनतस्येशेयंमह्यंनदद्युरितिप्रहितांवाअहमध्यात्मँसंयोगंनिविष्टँवेदैतद्धतदनीशानानिहवाअस्मैभूतानिबलिंहरंतियएवंवेदतत्सत्यंसदितिप्राणस्तीत्यन्नँयमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिवचक्षुःशुक्लंकृष्णंकनीनिकेतिसयदिहवाअपिमृषावदतिसत्यंहैवास्योदितंभवतियएवमेतत्सत्यस्यसत्यत्वंवेद ॥ ५ ॥ तस्यवाक्तंतिर्नामानिदामानितदस्येदंवाचातंत्यानामभिर्दामभिःसर्वंसितंसर्वंहीदंनामनीं ३ ॥ सर्ववाचाभिवदतिवहंतिहवाएनं

तंतिसंवद्धायएवंवेदतस्योष्णिग्लोमानित्वग्गायत्रीत्रिष्टुम्मांसमनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहतीँसच्छंदोभिश्छन्नोयच्छंदोभिश्छन्नंस्तस्माच्छंदांसीत्याचक्षतेच्छादयंतिहवाएनंच्छंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयतेयएवमेतच्छंदसांच्छंदस्त्वंवेदतदुक्तमृषिणापश्यंगोपामित्येषवैगोपाएषहीदंसर्वंगोपायत्यनिपद्यमानमितिंनह्येषकदाचनसंविशत्याचपराचपथिभिश्चरंतमितिंत्याचह्येषपराचपथिभिश्चरतिंससध्रीचीःसविषूचीर्वसानइतिंसध्रीचीश्चह्येषविषूचीश्चवस्तइमाएवदिशंआवरीवर्तिभुवनेष्वंतरितिंत्येषह्यंतर्भुवनेष्वावरीवर्त्तीथोआवृतासोवतासोनकर्तृभिरितिंसर्वंहीदंप्राणेनावृतँसोयमाकाशःप्राणेनबृहत्याविष्टब्धंस्तद्यथायमाकाशंःप्राणेनबृहत्याविष्टब्धंएवंसर्वाणिभूतान्यापिपीलिकाभ्यंःप्राणेनबृहत्याविष्टब्धानीत्येवंविद्यात् ॥ ६ ॥ अथातोविभूतयोस्यपुरुषस्यतस्यवाचासृष्टौपृथिवीचाग्निश्चास्यामोषधयोजायंतेग्निरेनास्वदयतींदमाहरतेदमाहरतेत्येवमेतौवाचंपितरंपरिचरतंःपृथिवीचाग्निश्चयावदनुपृथिवीयावदन्वग्निस्तावानस्यलोकोभवतिंनास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेंपृथिव्याश्चाग्नेश्चयएवमेतांवाचोविभूतिंवेदप्राणेनसृष्टावंतरिक्षंचवायुश्चांतरिक्षंवाअनुचरंत्यंतरिक्षमनुशृण्वंतिंवायुरस्मैपुण्यंगंधमावहत्येवमेतौप्राणंपितरंपरिचरतोंतरिक्षंचवायुश्चयावदन्वंतरिक्षंयावदनुवायुंस्तावानस्यलोकोभवतिंनास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेंतरिक्षस्यचवायोश्चयएवमेतांप्राणस्यविभूतिंवेदचक्षुषासृष्टौद्यौश्चादित्यश्चद्यौर्हास्मैवृष्टिमन्नाद्यंसंप्रयच्छत्यादित्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यज्योतिःप्रकाशंकरोत्येवमेतौचक्षुःपितरंपरिचरतोद्यौश्चादित्यश्चयावदनुद्यौर्यावदन्वादित्यस्तावानस्यलोकोभवति नास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेदिवश्चादित्यस्यचयएवमेतांचक्षुषोविभूतिंवेदश्रोत्रेणसृष्टादिशश्चचंद्रमाश्च दिग्भ्योहैनमायतीँ३॥ दिग्भ्योविशृणोतिचंद्रमाअस्मैपूर्वपक्षापरपक्षान्विचिनोतिपुण्यायकर्मणएवमेतेश्रोत्रंपितरंपरि चरंतिदिशश्चचंद्रमाश्चयावदनुदिशोयावदनुचंद्रमास्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेयावदेतेषांनजीर्यते दिशांचचंद्रमसश्चयएवमेतांश्रोत्रस्यविभूतिंवेदमनसासृष्टाआपश्चवरुणश्चापोहास्मैश्रद्धांसंनमंतेपुण्यायकर्मणेवरुणो स्यप्रजांधर्मेणदाधारैवमेतेमनःपितरंपरिचरंत्यापश्चवरुणश्चयावदन्वापोयावदनुवरुणस्तावानस्यलोकोभवतिनास्य तावल्लोकोजीर्यतेयावदेतेषांनजीर्यतेऽपांचवरुणस्यचयएवमेतांमनसोविभूतिंवेद ॥ ७ ॥ आपाइत्यापइति ॥ तदि दमापएवेदंवैमूलमदस्तूलमयंपितैतेपुत्रायत्रहकचपुत्रस्यतत्पितुर्यत्रवापितुस्तद्वापुत्रस्येत्येतत्तदुक्तंभवत्येतद्धस्मवैत द्विद्वानाहमहिदासऐतरेयआहंमांदेवेभ्योवेदा१३ओमद्देवान्वेदैतःप्रदानाह्येतइतःसंभृताइतिसएषगिरिश्चक्षुःश्रोत्रंम नोवाक्प्राणस्तंब्रह्मगिरिरित्याचक्षतेगिरतिहवैद्विषंतंपाप्मानंभ्रातृव्यंपरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदसए षोसुःसएषप्राणःसएषभूतिश्चाभूतिश्चतंभूतिरितिदेवाउपासांचक्रिरेतेवभूवुस्तस्माद्धाप्येतर्हिसुप्तोभूर्भूरित्येवप्रश्वसिं

१ वेदओमदितिभाष्यपाठः ।

त्यभूतिरित्यसुरास्ते'हं'पराबभूवुर्भवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदसएषमृत्युश्चैवामृतंचैतदुक्त मृषिणापाङ्प्राङेतिस्वधयागृभीतइत्यपानेनह्ययंयतःप्राणोनपराङ्भवत्यमर्त्योमर्त्येनासयोनिरित्येतेनहीदंसर्वंसयो निंमर्त्यानिहीमानिशरीराणीँ३॥अमृतैषादेवतोताशश्वंताविषूचीनावियंतान्य१न्यंचिक्युर्ननिचिक्युरन्यमितिनिचि न्वंतिहैवेमानिशरीराणीँ ३ ॥ अमृतैवैषादेवतोऽमृतोहवामुष्मिंल्लोकेसंभवत्यमृतःसर्वेभ्योभूतेभ्योदृष्टशेयएवंवेदयए वंवेद ॥८॥ इतिद्वितीयारण्यकेप्रथमोध्यायः ॥१॥ ॥ एषइमंलोकमभ्यार्चत्पुरुषरूपेणयएषतपतिप्राणोवावतदभ्या र्चत्प्राणोह्येषयएषतपतितंशतंवर्षाण्यभ्यार्चत्तस्माच्छतंवर्षाणिपुरुषायुषोभवंतितंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतर्चि नस्तस्माच्छतर्चिनइत्याचक्षतेएतमेवसंतंसइदंसर्वमध्यतोदधेयदिदंकिंचसयदिदंसर्वमध्यतोदधेयदिदंकिंचतस्मान्मा ध्यमास्तस्मान्माध्यमाइत्याचक्षतेएतमेवसंतंप्राणोवैगृत्सोऽपानोमदःसयत्प्राणोगृत्सोपानोमदस्तस्माद्गृत्समदस्तस्माद्गृ त्समदइत्याचक्षतेएतमेवसंतंतस्येदंविश्वंमित्रमासीद्यदिदंकिंचतद्यदस्येदंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामि त्रस्तस्माद्विश्वामित्रइत्याचक्षतेएतमेवसंतंतेदेवाअब्रुवन्नयंवैनःसर्वेषांवामइतितंयद्देवाअब्रुवन्नयंवैनःसर्वेषांवामइति तस्माद्वामदेवस्तस्माँद्वामदेवइत्याचक्षतेएतमेवसंतंसइदंसर्वंपाप्मनोत्रायतयदिदंकिंचसयदिदंसर्वंपाप्मनोत्रायतय

१ तेपराबभूवुरितिभाष्यपाठः ।

॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिदंकिंचंतस्मादत्रयस्तस्मादत्रयइंत्याचक्षतएतमेवसंतं ॥ ९ ॥ एषउएवबिभ्रद्वाजंःप्रजावैवाजस्ताएषबिभर्तियद्बिभ
र्तिंतस्माद्भरद्वाजंस्तस्माद्भरद्वाजइत्याचक्षतंएतमेवसंतंतंदेवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतिंतंयद्देवाअब्रुवन्नयंवैनःस
र्वेषांवसिष्ठइतिंतस्माद्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतंएतमेवसंतंसइदंसर्वमभिप्रागाद्यदिदंकिंचंसयदिदंसर्वमभिप्रागा
द्यदिदंकिंचंतस्मात्प्रगाथांस्तस्मात्प्रगाथाइत्याचक्षतंएतमेवसंतंसइदंसर्वमभ्यपवयतयदिदंकिंचंसयदिदंसर्वमभ्यपव
यतयदिदंकिंचंतस्मात्पावमान्यस्तस्मात्पावमान्यइत्याचक्षतंएतमेवसंतंसोब्रवींदहमिदंसर्वमसानिंयच्चक्षुद्रंयच्चमहदि
तिंतेक्षुद्रसूक्ताश्चाभवन्महासूक्ताश्चंतस्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्ताइत्याचक्षतंएतमेवसंतंसूक्तंबतावोचतोतिंतत्सूक्तम
भवत्तस्मात्सूक्तंतस्मात्सूक्तमित्याचक्षतंएतमेवसंतमेषवाऋंगेषह्येभ्यःसर्वेभ्योभूतेभ्योर्चंतंसयदेभ्यःसर्वेभ्योभूतेभ्योर्च
तंतस्माद्दृक्तस्माद्दृगित्याचक्षतंएतमेवसंतमेषवाअर्धर्चंएषह्येभ्यःसर्वेभ्योर्धेभ्योर्चंतंसयदेभ्यःसर्वेभ्योर्धेभ्योर्चंततस्मा
दर्धर्चस्तस्मादर्धर्चइत्याचक्षतंएतमेवसंतमेषवैपदंमेषहीमानिसर्वाणिभूतानिपार्दिसयदिमानिसर्वाणिभूतानिपार्दित
स्मात्पदंतस्मात्पदमित्याचक्षतंएतमेवसंतमेषवाअक्षरंमेषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतिंनचैनमतिक्षरंतिंसयदेभ्यःसर्वे
भ्योभूतेभ्यःक्षरतिंनचैनमतिक्षरंतिंतस्मादक्षरंतस्मादक्षरमित्याचक्षतंएतमेवसंतंतावाएताःसर्वाऋचंःसर्वेवेदाःसर्वेघो
षाएकैवव्याहृतिंःप्राणएवप्राणऋचइत्येवविद्यात्॥१०॥ विश्वामित्रंह्येतदहःशंसिष्यंतंमिंद्रउपनिषससादंसहान्नमित्य

भिव्याहृत्यंबृहतीसहस्रंशशंसंतेनेंद्रस्यप्रियंधामोपेयायंतमिंद्रउवाचंऋषेप्रियंवैमेधामोपागांःसवाऋषेद्वितीयंशंसेतिंस
हान्नमित्येवाभिव्याहृत्यंबृहतीसहस्रंशशंसंतेनेंद्रस्यप्रियंधामोपेयायंतमिंद्रउवाचंऋषेप्रियंवैमेधामोपागांःसवाऋषेतृती
यंशंसेतिंसहान्नमित्येवाभिव्याहृत्यंबृहतीसहस्रंशशंसंतेनेंद्रस्यप्रियंधामोपेयायंतमिंद्रउवाचंऋषेप्रियंवैमेधामोपागांव
रंतेददामीतिसहोवाचंत्वामेवजानीयामितिंतमिंद्रउवाचंप्राणोवाअहमस्म्यृषेप्राणस्त्वंप्राणःसर्वाणिभूतानिंप्राणोह्येष
यएषतपतिंसएतेनरूपेणसर्वादिशोविष्टोस्मितस्यमेऽन्नंमित्रंदक्षिणंतद्वैश्वामित्रंमेषतपन्नेवास्मीतिहोवाच ॥११॥ तद्वा
इदंबृहतीसहस्रंसंपन्नंतस्ययानिव्यंजनानितच्छरीरंयोघोषःसआत्मायऊष्माणःसप्राणंएतद्धस्मवैतद्विद्वान्वसिष्ठोव
सिष्ठोवभूवंततएतन्नामधेयंलेभेएतदुहैवेंद्रोविश्वामित्रायप्रोवाचैतदुहैवेंद्रोभरद्वाजायप्रोवाचंतस्मात्सतेनबंधुनायज्ञे
षुह्रयतेंतद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंतिंतावंतिशत
संवत्सरस्याह्नांसहस्राणिभवंतिंव्यंजनैरेवरात्रीराप्नुवंतिस्वरैरहानिंतद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसह
स्रस्यसंपन्नस्यपरस्तात्प्रज्ञामयोंदेवतामयोब्रह्ममयोंमृतमयःसंभूयंदेवताअप्येतियएवंवेदंतद्योहंसोसौयोसौसोहंतदुक्त
मृषिणांसूर्यआत्माजगतस्तस्थुषश्चेंत्येतदुहैवोपेक्षेतोपेक्षेत ॥ १२ ॥ इतिद्वितीयारण्यकेद्वितीयोध्यायः ॥ २ ॥ ॥
योहवाआत्मानंपंचविधमुक्थंवेदंयस्मादिदंसर्वमुत्तिष्ठतिसंप्रतिंवित्पृथिवीवायुराकाशंआपोज्योतींषींत्येषवाआत्मो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंपंचविधंमेतस्माद्धीदंसर्वमुत्तिष्ठत्येतमेवाप्येत्ययनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्न
न्नादोजायतेभवत्यस्यान्नमापश्चपृथिवीचान्नंमेतन्मयानिह्यन्नानिभवंतिज्योतिश्चवायुश्चान्नादंमेताभ्यांहीदंसर्वमन्नम
त्यावपनमाकाशंआकाशेहीदंसर्वंसमोप्यतंआवपनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्ना
दोजायतेभवत्यस्यान्नमोषधिवनस्पतयोन्नंप्राणभृतोन्नादंमोषधिवनस्पतीन्हिप्राणभृतोदंतिंतेषांयउभयतोदंताःपुरुष
स्यानुविधाविहितास्तेन्नादाअन्नमितरेपशवस्तस्मात्तइतरान्पशूनधीवचरंत्यधीवह्यन्नेन्नादोभवत्यधीवहसमानानांजा
यतेयएवंवेद ॥ १३ ॥ तस्ययआत्मानमाविस्तरांवेदाश्नुतेहाविर्भूयंओषधिवनस्पतयोयच्चकिंचप्राणभृत्सआत्मान
माविस्तरांवेदौषधिवनस्पतिषुहिरसोदृश्यतेचित्तंप्राणभृत्सुप्राणभृत्सुत्वेवाविस्तरामात्मांतेषुहिरसोपिदृश्यतेंन चित्त
मितरेषुपुरुषेत्वेवाविस्तरामात्मांसहिप्रज्ञानेनसंपन्नतमोंविज्ञातंवदतिविज्ञातंपश्यतिंवेदश्वस्तनंवेदलोकालोकौमर्त्ये
नामृतमीप्सत्येवंसंपन्नोऽथेतरेषांपशूनामशनापिपासेएवाभिविज्ञानंनविज्ञातंवदंतिनविज्ञातंपश्यंतिंनविदुःश्वस्तनंन
लोकालोकौतएतावंतोभवंतियथाप्रज्ञंहिसंभवाः ॥ १४ ॥ सएषपुरुषःसमुद्रःसर्वंलोकमतियद्धाकिंचाश्नुतेत्येनंमन्य
तेयद्यंतरिक्षलोकमश्नुतेत्येनंमन्यतेयद्यमुंलोकमश्नुवीतात्येवैनंमन्येतंसएषपु रुषःपंचविधंस्तस्ययदुष्णंतज्ज्योतिर्यानि
खानिसआकाशोऽथयल्लोहितंश्लेष्मारेतस्तापोयच्छरीरंसापृथिवीयःप्राणःसवायुंःसएषवायुःपंचविधंःप्राणोपानो

व्यानउदानःसमानंस्ताएतादेवताःप्राणापानयोरेवनिविष्टाश्चक्षुःश्रोत्रंमनोवागितिंप्राणस्यह्यन्वपायमेताअपियंतिंस
एषवाचश्चित्तस्योत्तरोत्तरिक्रमोयद्यज्ञंःसएषयज्ञःपंचविधोऽग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमंःसएषयज्ञा
नांसंपन्नतमोयत्सोमंएतस्मिन्ह्येताःपंचविधाअधिगम्यंतेंयत्प्राक्सवनेभ्यःसैकाविधात्रीणिसवनानियदूर्ध्वंसापंचमी
॥ १५ ॥ योहवैयज्ञेयज्ञंवेदाहन्यहर्देवेषुदेवमध्यूह्वंससंप्रतिविदेंषवैयज्ञेयज्ञोहन्यहर्देवेषुदेवोध्यूह्वोंयदेतन्महदुक्थंतदे
तत्पंचविधंत्रिवृत्पंचदशंसप्तदशंमेकविंशंपंचविंशमितिंस्तोमतोगायत्रंरथंतरंबृहद्भद्रंराजनमितिंसामतोगायत्र्युष्णिक्
बृहतीत्रिष्टुप्द्विपदेतिंच्छंदस्तःशिरोदक्षिणःपक्षंउत्तरःपक्षःपुच्छमात्मेत्याख्यानंपंचकृत्वःप्रस्तौतिंपंचकृत्वउद्गायतिंपं
चकृत्वःप्रतिहरतिंपंचकृत्वउपद्रवतिंपंचकृत्वोनिधनमुपयंतिंतत्स्तोभसहस्रंभवत्येवंह्येताःपंचविधाअनुशस्यंतेंयत्प्राक्
तृचाशीतिभ्यःसैकाविधातिस्रःस्तृचाशीतयोंयदूर्ध्वंसापंचमीतदेतत्सहस्रंतत्सर्वतानिदशदशेतिंवैसर्वमेतावतीहिसं
ख्यादशदशतस्तच्छतंदशशतानितत्सहस्रंतत्सर्वतानित्रीणिच्छंदांसिभवंतिंत्रेधाविहितंवाइदमन्नमशनंपानंखादस्तदे
तैराप्नोति ॥१६॥ तद्वाइदंबृहतीसहस्रंसंपन्नंतद्धैतदेकेनानाच्छंदसांसहस्रंप्रतिजानतेंकिमन्यत्सदन्यद्भूयामेतिंत्रिष्टुप्
सहस्रमेकेंजगतीसहस्रमेकेंनुष्टुप्सहस्रमेकेंतदुक्तमृषिणाऽनुष्टुभमनुचंर्चूर्यमाणमिंद्रंनिचिक्युःकवयोमनीषेतिंवाचिवै

१ चञ्चूर्यमाणमितिभाष्यपाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदैंद्रंप्राणंन्यचार्यन्नित्येतत्तदुक्तंभवतिंसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोंरीश्वरोहतुपुरायुषःप्रैतोरितिहस्माहांकृत्स्नोह्येषआत्मांयद्भागभिहिप्राणेनंमनसेस्यमानोवाचानानुभवतिंबृहतीमभिसंपादयेंदेषवैकृत्स्नआत्मायद्बृहतींसोयमात्मासर्वतःशरीरैःपरिवृतंस्तद्यथायमात्मासर्वतःशरीरैःपरिवृतंएवमेवबृहतीसर्वतश्छंदोभिःपरिवृतांमध्यंह्येषामंगानामात्मांमध्यंच्छंदसांबृहतींसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोंरीश्वरोहतुपुरायुषःप्रैतोरितिहस्माहंकृत्स्नोह्येषआत्मायद्बृहतींतस्माद्बृहतीमेवाभिसंपादयेत् ॥ १७ ॥ तद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यैकादशानुष्टुभांशतानिभवंतिंपंचविंशतिश्चानुष्टुभंआत्तंवैभूयसाकनीयंस्तदुक्तमृषिणांवाचमष्टापदीमहंमित्यष्टौहिचतुरक्षराणिभवंतिंनवस्रक्तिमितिबृहतीसंपद्यमानांनवस्रक्त्यृतस्पृशमितिंसत्यंवैवागृचास्पृष्टैंद्रात्परितन्वंममइतिंतद्यदेवैतद्बृहतीसहस्रमनुष्टुप्संपन्नंभवतिंतस्मात्तदैंद्रात्प्राणाद्बृहत्यैवाचमनुष्टुभंतन्वंसंनिर्मिमीतेंसवाएषवाचःपरमोविकारोंयदेतन्महदुक्थंतदेतत्पंचविधंमितममितंस्वरःसत्यानृतेइत्यृग्गाथाकुंब्यातन्मितंयजुर्निगदोंवृथावाक्तदमितंसामाथोयःकश्चगेष्णःसःस्वरंओमितिसत्यंनेत्यनृतंतदेतत्पुष्पंफलंवाचोयत्सत्यंसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोंःपुष्पंहिफलंवाचःसत्यंवदंत्यथैतन्मूलंवाचोयदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्ततएवमेवानृतंवदन्नाविर्मूलमात्मानंकरोतिंसशुष्यतिसउद्वर्ततेंतस्मादनृतंनवदेद्दयेतत्वेनेनंपराग्वाएतद्रिक्तमक्षरंयदेतदो३मितिंतद्यत्किंचोमित्याहांत्रै ॥१४॥

वास्मैतद्रिच्यतेंसयत्सर्वमोंकुर्याद्रिंच्यादात्मानंसकामेभ्योनालंस्यादथैतत्पूर्णमभ्यात्मंयन्नेतिंसयत्सर्वंनेतिब्रूयात्पापिकास्यकीर्तिर्जायेतंसैनंतत्रैवहन्यात्तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्यानृतेमिथुनीकरोतिंतयोर्मिथुनात्प्रजायतेंभूयान्भवतिंयोवैतांवाचंवेदंयस्याएषविकारःससंप्रतिविदंकारोवैसर्वावाक्सैषास्पर्शोष्मभिर्व्यज्यमानांबह्वीनानारूपाभवतिंतस्यैयदुपांशुसप्राणोंऽथयदुच्चैस्तच्छरीरंतस्मात्तत्तिरइवतिरइवह्यशरीरंमशरीरोहिप्राणोंऽथयदुच्चैस्तच्छरीरंतस्मात्तदाविराविर्हिशरीरं ॥ १८ ॥ तद्वाइदंबृहतीसहस्रंसंपन्नंतद्यशःसइंद्रःसभूतानामधिपतिंःसयएवमेतामिंद्रंभूतानामधिपतिंवेदंविस्रसाहैवास्माल्लोकात्प्रैतीतिहस्माहंमहिदासऐतरेयंःप्रेत्यैंद्रोभूत्वैषुलोकेषुराजतिंतदाहुर्यदनेनरूपेणांमुंलोकमभिसंभवतीँ३अथकेनरूपेणेमंलोकमाभवतीँ३ ॥ तद्यदेतत्स्त्रियांलोहितंभवत्यग्नेस्तद्रूपंतस्मात्तस्मान्नबीभत्सेतांथयदेतत्पुरुषेरेतोभवत्यादित्यस्यतद्रूपंतस्मात्तस्मान्नबीभत्सेतंसोयमात्मेममात्मानंमुष्माआत्मनेसंप्रयच्छत्यसावात्मामुमात्मानंमिमस्माआत्मनेसंप्रयच्छतिंतावन्योन्यमभिसंभवतोंऽनेनाहरूपेणामुंलोकमभिसंभवत्यमुनोरूपेणेमंलोकमाभवति ॥१९॥ तत्रैतेश्लोकाःइ ॥ यदक्षरंपंचविधंसमेतिंयुजोयुक्ताअभियत्संवहंति ॥ सत्यस्यसत्यमनुयत्रयुज्यतेंतत्रदेवाःसर्वएकंभवंति ॥ यदक्षरादक्षरमेतियुक्तैंयुजोयुक्ताअभियत्संवहंति ॥ सत्यस्यसत्यमनुयत्रयुज्यतेंतत्रदेवाःसर्वएकंभवंति ॥ यद्वाचओमितियच्चनेतियच्चास्याःक्रूरंयदुचोल्वणिष्णु ॥ तद्वियूयाकवयोअन्वावेंदंन्नामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्तासमतृप्यञ्छृतेधि ॥ यस्मिन्नामासमतृप्यञ्छृतेधितत्रदेवाःसर्वयुजोभवंति ॥ तेनपाप्मानमपहत्यब्रह्मणास्वर्गं
लोकमप्येतिविद्वान् ॥ नैनंवाचास्त्रियंब्रुवन्नैनमस्त्रीपुमान्ब्रुवन् ॥ पुमांसंनब्रुवन्नैनंवदन्वदतिकश्चन ॥ अःइतिब्रह्म
तत्रागतमहमितिंतद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंति
तावंतिपुरुषायुषोह्वांसहस्राणिभवंतिजीवाक्षरेणैवजीवाहराप्नोतिजीवाह्वाजीवाक्षरमित्यनकाममारोऽथदेवरथस्तस्य
वागुद्धिःश्रोत्रेपक्षसीचक्षुषीयुक्तेमनःसंग्रहीतातदयंप्राणोधितिष्ठतितदुक्तमृषिणाऽऽतेनयातंमनसोजवीयसानिमिष
श्चिज्जवीयसेतिजवीयसेति ॥२०॥ इत्यैतरेयद्वितीयारण्यकेतृतीयोध्यायः ॥ ३ ॥ ॥ आत्मावाइदमेकएवाग्रआसीं
न्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमाँल्लोकानसृजताँभोमरीचीर्मरमापोदोंभःपरेणदिवंद्यौःप्रतिष्ठांतरिक्षं
मरीचयःपृथिवीमरोयाअधस्तात्तआपःसईक्षतेमे'नु'[1]लोकालोकपालान्नुसृजाइतिसोद्भ्यएवपुरुषंसमुद्धृत्यामूर्च्छयत्तम
भ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यतयथांडंमुखाद्वाग्वाचोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणःप्राणाद्वायुरक्षि
णीनिरभिद्येतांमक्षीभ्यांचक्षुश्चक्षुषआदित्यःकर्णौनिरभिद्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्निरभिद्यतत्वचोलोमा
निलोमभ्यओषधिवनस्पतयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्याअपानोऽपानान्मृत्युः

१ मेलोकाइतिभाष्यपाठः ।

शिश्नंनिरभिद्यतशिश्नाद्रेतोरेतसआपः ॥ २१ ॥ ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्रापतँस्तमशनापिपासाभ्याम
न्ववार्जत्ताएनमब्रुवन्नायतनंनःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेतिताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमिति
ताभ्योश्वमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुवन्त्सुकृतंबतेतिपुरुषोवावसुकृतंताअब्रवीद्यथा
यतनंप्रविशतेत्यग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षुर्भूत्वाक्षिणीप्राविशद्दिशःश्रो
त्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयोलोमानिभूत्वात्वचंप्राविशँश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वा
नाभिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशँस्तमशनापिपासेअब्रूतांमावाभ्यामभिप्रजानीहीतितेअब्रवीदेतास्वेववांदेव
तास्वाभजाम्येतासुभागिन्यौकरोमीतितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्यामशनापिपासेभवतः
॥ २२ ॥ सईक्षतेमेनुलोकाश्चलोकपालाश्चान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्योमूर्तिरजायतयावैसामू
र्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराङत्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य
हैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजि
घृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यदृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसय
द्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्स्यंत्तन्मनसाजिघृक्षंत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यंद्ध्यात्वाहैवान्नमत्रप्स्यंत्तच्छिश्नेनाजिघृक्षंत्तन्ना
शक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यंद्विसृज्यहैवान्नमत्रप्स्यंत्तदपानेनाजिघृक्षंत्तदावयत्सैषोन्नस्यग्रहोयद्वायुर
न्नायुर्वाएषयद्वायुंःसईक्षतकथंन्विदंमद्दतेस्यादितिंसईक्षतकतरेणप्रपद्याइतिंसईक्षतयदिवाचाभिव्याहृतंयदिप्राणेना
भिप्राणितंयदिचक्षुषादृष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदिशिश्नेनविसृष्टंम
थकोहमितिंसएतमेवसीमानंविदार्य्यैतयाद्वारात्प्रापद्यतंसैषाविदृतिर्नामद्वांस्तदेतन्नान्दनंतस्यत्रयआवसथास्त्रयःस्वप्ना
अयमावसथोयमावसथोयमावसथइतिंसजातोभूतान्यभिव्यैख्यत्किमिहान्यंवावदिषदितिंसएतमेवपुरुषंब्रह्मततम
मपश्यदिदमदर्शमितीँ३ ॥ तस्मादिदंद्रोनामेदंद्रोहवैनामंतमिदंद्रंसंतमिंद्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाः
परोक्षप्रियाइवहिदेवाः ॥ २३ ॥ इत्यैतरेयद्वितीयारण्यकेचतुर्थोध्यायः ॥ ४ ॥ ॥ अपक्रामंतुगर्भिण्यः ॥ पुरु
षेहवाअयमादितोगर्भोभवतियदेतद्रेतंस्तदेतत्सर्वेभ्योंगेभ्यस्तेजःसंभूतंमात्मन्येवात्मानंबिभर्तितद्यदास्त्रियांसिंचत्य
थैनज्जनयतितदस्यप्रथमंजन्मंतत्स्त्रियाआत्मभूयंगच्छतियथास्वमंगंतथांतस्मादेनांनहिनस्तिसास्यैतमात्मानमत्रगतं
भावयतिंसाभावयित्रीभावयितव्याभवतिंतंस्त्रीगर्भंबिभर्तिंसोग्रएवकुमारंजन्मनोग्रेधिभावयतिंसयत्कुमारंजन्मनो
ग्रेधिभावयंत्यात्मानमेवतद्भावयंत्येषांलोकानांसंतत्यांएवंसंततांहीमेलोकांस्तदस्यद्वितीयंजन्मंसोस्यायमात्मांपुण्ये

भ्यःकर्मभ्यःप्रतिधीयतेंऽथास्यायमितरआत्मांकृतकृत्योवयोगतःप्रैतिंसइतःप्रयन्नेवपुनर्जायतेंतदस्यतृतीयंजन्मंतदु
क्तमृषिणांगर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिंमानिविश्वां ॥ शतंमापुरआयसीररक्षन्नधश्येनोजवसानिरंदीयमितिं
गर्भएवैतच्छयानोवामदेवएवमुवाचंसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यांमुष्मिन्त्स्वर्गेलोकेंसर्वान्कामानाप्त्वां
मृतःसमभवत्समभवत् ॥ २४ ॥ यथास्थानंतुगर्भिण्यः ॥ इत्यैतरेयद्वितीयारण्यकेपंचमोध्यायः ॥५॥ ॥ कोय
मात्मेतिवयमुपास्महेंकतरःसआत्मांयेनवापश्यतियेनवाशृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनवा
स्वादुचास्वादुचविजानातियदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिः
संकल्पःक्रतुरसुःकामोवशइतिंसर्वाण्येवैतानिप्रज्ञानस्यनामधेयानिभवंत्येषब्रह्मैषइंद्रंएषप्रजापतिरेतेसर्वेदेवांइमा
निचपंचमहाभूतानिंपृथिवीवायुराकाशंआपोज्योतींषीत्येतानीमानिचक्षुद्रमिश्राणीवंबीजानीतराणिचेतराणिंचांड
जानिचजारुजानिंचस्वेदजानिचोद्भिजानिचांश्वागावःपुरुषाहस्तिनोयत्किंचेदंप्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वं
तत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकंःप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मसएतेनप्रज्ञेनात्मनांस्माल्लोकादुत्क्रम्यामुष्मिन्त्स्वर्गे
लोकेंसर्वान्कामानाप्त्वामृतःसमभवत्समभवत् ॥ २५ ॥ इत्यैतरेयद्वितीयारण्यकेषष्ठोध्यायः ॥ ६ ॥ ॥ वाङ्मेमन

१ इदंवाक्यंनभाष्यसंमतम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधि ॥ वेदस्यमआणीस्थःश्रुतंमेमाप्रहासीरनेनाधीतेनाहोरात्रान्संद
धाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारं ॥ २६ ॥ इत्यैतरेयद्वि
तीयारण्यकेसप्तमोध्यायः ॥ ७ ॥ ॥ द्वितीयारण्यकंसमाप्तं ॥ ॥ ॥ ॥

हरिःॐ ॥ अथातःसंहितायाउपनिषत्पृथिवीपूर्वरूपंद्यौरुत्तररूपंवायुःसंहितेतिमांडूकेयआकाशःसंहितेत्यस्य
माक्षव्योवेदयांचक्रेसहाविपरिहृतोमेनेनमेस्यपुत्रेणसमगादितिसमानेनैवैतत्परिहृतोमेनइत्यागस्त्यःसमानंह्येतद्भवति
वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपंप्राणःसंहितेतिशूरवीरोमांडूकेयोथहास्यपुत्रआहज्येष्ठो
मनःपूर्वरूपंवागुत्तररूपंमनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतितस्मान्मनएवपूर्वरूपंवागुत्तररूपंप्राणस्त्वेवसंहिते
तिसमानमेनयोरत्रपितुश्चपुत्रस्यचसएषोश्वरथःप्रष्टिवाहनोमनोवाक्प्राणसंहतःसयएवमेतांसंहितांवेदसंधीयतेप्रज
यापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतीतिनुमांडूकेयानां ॥ १ ॥ अथशाकल्यस्यपृथिवीपूर्वरूपंद्यौ
रुत्तररूपंवृष्टिःसंधिःपर्जन्यःसंधातातदुतापियत्रैतद्बलवदनूद्गृह्णन्त्संदधदहोरात्रेवर्षतिद्यावापृथिव्यौसमधातामित्यु
ताप्याहुरितीन्वधिदैवतमथाध्यात्मंपुरुषोहवाअयंसर्वआदन्द्वैविदलेभवतइत्याहुस्तस्येदमेवपृथिव्यारूपमिदंदिवस्त
त्रायमंतरेणाकाशोयथासौद्यावापृथिव्यावंतरेणाकाशस्तस्मिन्हस्मिन्नाकाशेप्राणआयत्तोयथामुष्मिन्नाकाशेवायुराय

त्तोयथामूनित्रीणिज्योतींष्येवमिमानिपुरुषेत्रीणिज्योतींषियथासौदिव्यादित्यएवमिदंशिरसिचक्षुर्यथासावंतरिक्षे
विद्युदेवमिदमात्मनिहृदयंयथायमग्निःपृथिव्यामेवमिदमुपस्थेरेतएवमुहस्मसर्वलोकमात्मानमनुविधायाहैदमेवपृ
थिव्यारूपमिदंदिवंःसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥
॥ २ ॥ अथातोनिर्भुजप्रवादाःपृथिव्यायतनंनिर्भुजंदिव्यायतनंप्रतृण्णंमंतरिक्षायतनमुभयमंतरेणाथयद्येनंनिर्भुजं
ब्रुवंतमुपवदेदच्योष्टावराभ्यांस्थानाभ्यामित्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवंतमुपवदेदच्योष्टाउत्तराभ्यांस्थानाभ्यामित्ये
नंब्रूयाद्यस्त्वेवोभयमंतरेणाहतस्यनास्त्युपवादोयद्धिसंधिंविवर्तयतितन्निर्भुजस्यरूपंमथयच्छुद्धेअक्षरेअभिव्याहरति
तत्प्रतृण्णस्याग्रउएवोभयमंतरेणोभयंव्याप्तंभवत्यन्नाद्यकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्णंमुभयकामउभयमंतरेणा
थयद्येनंनिर्भुजंब्रुवंतंपरउपवदेत्पृथिवींदेवतामारंःपृथिवीत्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवंतंपरउपवदे
दिवंदेवतामारोद्यौस्त्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनमुभयमंतरेणब्रुवंतंपरउपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादे
वतारिष्यतीत्येनंब्रूयाद्यथातुकथाचब्रुवन्वाब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिद्यु
म्नएवब्राह्मणंब्रूयान्नातिद्युम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमांडूकेयः ॥ ३ ॥ अथातोनु
व्याहाराःप्राणोवंशइतिविद्यात्सयएनंप्राणवंशमुपवदेच्छक्नुवन्चेन्मन्येतप्राणंवंशंसमर्धाँ ३ ॥ प्राणंमावंशंसंदधतंनश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोषीत्याहप्राणस्त्वावंशोहास्यतीत्येनंब्रूयादथचेदशक्नुवंतंमन्येतप्राणंवंशंसमधित्सिषँतंनाशकःसंधातुंप्राणस्त्वावंशो
हास्यतीत्येनंब्रूयाद्यथातुकथाचब्रुवन्वाब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिद्युम्नए
वब्राह्मणंब्रूयान्नातिद्युम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमांडूकेयः ॥ ४ ॥ अथखल्वाहुर्निर्भु
जवक्राःपूर्वमक्षरंपूर्वरूपमुत्तरमुत्तररूपँयोवकाशःपूर्वरूपोत्तररूपेअंतरेणसासंहितेतिसयएवमेतांसंहितांवेदसंधीयते
प्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथवयंब्रूमोनिर्भुजवक्राइतिहस्माहह्रस्वोमांडूकेयःपूर्वमेवा
क्षरंपूर्वरूपमुत्तरमुत्तररूपँयोवकाशःपूर्वरूपोत्तररूपेअंतरेणयेनसंधिंविवर्तयतियेनस्वरास्वरंविजानातियेनमात्रामात्रां
विभजतेसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथहा
स्यपुत्रआहमध्यमःप्रातीबोधीपुत्रोक्षरेखल्विमेअविकर्षन्नेकीकुर्वन्यथावर्णमाहतद्यासौमात्रापूर्वरूपोत्तररूपेअंतरेण
संधिविज्ञपनीसामतद्भवतिसामैवाहंसंहितांमन्यइतितदप्येतदृषिणोक्तंबृहस्पतेनपरःसाम्नोविदुरितिसयएवमेतांसं
हितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥ ५ ॥ बृहद्रथंतरयोरूपेणसंहितासं
धीयतइतिताक्ष्र्योवाग्वैरथंतरस्यरूपंप्राणोबृहतउभाभ्यामुखलुसंहितासंधीयतेवाचाचप्राणेनचैतस्यांहस्मोपनिषदिसं
वत्सरंगारक्षयतेताक्ष्र्यएतस्यांहस्ममात्रायांसंवत्सरंगारक्षयतेताक्ष्र्यस्तदप्येतदृषिणोक्तंरथंतरमाजभारावसिष्ठः ॥ भ

रद्वाजोबृहदाचक्रेअग्नेरितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति
वाक्प्राणेनसंहितेतिकौंठरव्यःप्राणःपवमानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेनस्वर्गोलोकोब्रह्मणासैषाऽवरप
रासंहितासयोहैतामवरपरांसंहितांवेदैवंहैवसप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसंधीयतेयथैषासंहितास
यदिपरेणवोपसृतःस्वेनवार्थेनाभिव्याहरेदभिव्याहार्षन्नेवविद्यादिवंसंहितागमद्भिदुषांदेवानामेवंभविष्यतीतिशश्व
त्तथास्यात्सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिवाक्संहितेतिपं
चालचंडोवाचावैवेदाःसंधीयंतेवाचाछंदांसिवाचामित्राणिसंदधतिवाचासर्वाणिभूतान्यथोवागेवेदंसर्वमितितद्यत्रै
तदधीतेवाभाषतेवावाचितदाप्राणोभवतिवाक्तदाप्राणंरेढ्यथयत्रतूष्णींवाभवतिस्वपितिवाप्राणेतदावाग्भवतिप्रा
णस्तदावाचंरेढ्हितावन्योन्यंरीढ्होवाग्वैमाताप्राणःपुत्रस्तदप्येतदृषिणोक्तंमेकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुव
नंविचष्टे ॥ तंपाकेनमनसापश्यमंतितस्तंमातारेढ्हिसउरेढ्हिमातरमितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्य
शसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथातःप्रजापतिसंहिताजायापूर्वरूपंपतिरुत्तररूपंपुत्रःसंधिःप्रजननंसंधानं
सैषादितिःसंहितादितिर्हीदंसर्वंयदिदंकिंचपिताचमाताचपुत्रश्चप्रजननंचतदप्येतदृषिणोक्तंमदितिर्मातासपितासपु
त्रइतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिसर्वमायुरेति ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यैतरेयतृतीयारण्यकेप्रथमोध्यायः ॥ १ ॥ ॥ प्राणोवंशइतिस्थविरःशाकल्यस्तद्यथाशालावंशैसर्वेन्येवंशाःसमाहिताःस्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रंमनोवागिंद्रियाणिशरीरंसर्वआत्मासमाहितंस्तस्यैतस्यात्मनंःप्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानःस्वररूपंमांसंलोहितमित्येतदन्यच्चतुर्थमंतस्थारूपंमितिहस्माहह्स्वोमांडूकेयस्त्रयंत्वेवनएतत्प्रोक्तंतस्यैतस्यत्रयस्यास्थ्नौमज्ज्ञांपर्वणामितींत्रीणीतःषष्टिशतानींत्रीणीतस्तानिसप्तविंशतिशतानिभवंतींसप्तचवैशतानिविंशतिश्चसंवत्सरस्याहोरात्राःसएषोहःसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमहःसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाह्वांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति ॥ ७ ॥ अथकौंठरव्यस्त्रीणिषष्टिशतान्यक्षराणांत्रीणिषष्टिशतान्यूष्मणांत्रीणिषष्टिशतानिसंधीनांयान्यक्षराण्यवोचामाहानितानियानूष्मणोवोचामरात्रयस्तांयान्तसंधीनवोचामाहोरात्राणांतेसंधयइत्यधिदैवतमथाध्यात्मंयान्यक्षराण्यधिदैवतमवोचामास्थीनितान्यध्यात्मंयानूष्मणोधिदैवतमवोचाममज्जानस्तेध्यात्ममेषहवैसंप्रतिप्राणोंयन्मज्जैतद्रेतोनहवाऋतेप्राणाद्रेतःसिच्यतेयद्वाऋतेप्राणाद्रेतःसिच्येतपूयेन्नसंभवेद्यान्तसंधीनधिदैवतमवोचामपर्वाणितान्यध्यात्मंतस्यैतस्यत्रयस्यास्थ्नौमज्ज्ञांपर्वणामितींपंचेतश्चत्वारिंशच्छतानिंपंचेतस्तदशीतिसहस्रंभवत्यशीतिसहस्रंवाअर्कलिनोबृहतीरहरभिसंपादयंतिसएषोक्षरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवा ङ्मयआत्मासयएवमे

तमक्षरस्संमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाक्षराणांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति ॥८॥ चत्वारःपुरुषाइतिबाध्वंःशरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइतिंशरीरपुरुषइतियमवोचामसयएवायंदैहिकआत्मातस्ययोयमशरीरःप्रज्ञात्मासरसश्छंदःपुरुषइतियमवोचामाक्षरसमाम्नायएवतस्यैतस्याकारोरसोवेदपुरुषइतियमवोचामयेनवेदान्वेदंऋग्वेदंयजुर्वेदंसामवेदंतस्यैतस्यब्रह्मारसस्तस्माद्ब्रह्माणंब्रह्मिष्ठंकुर्वीतयोयज्ञस्योल्बणंपश्येन्महापुरुषइतियमवोचामसंवत्सरएवप्रध्वंसयन्नन्यानिभूतान्यैक्याभावयन्नन्यानितस्यैतस्यासावादित्योरसःसयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तस्मात्पुरुषंपुरुषंप्रत्यादित्योभवतितदप्येतदृषिणोक्तंचित्रंदेवानामुदगादनींकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्मा जगतस्तस्थुषश्चैत्येतामनुविधंसंहितांसंधीयमानांमन्यइतिहस्माहबाध्वंएतंह्येवबह्वृचामहत्युक्थेमीमांसंतेएतमग्नावध्वर्यवंएतंमहात्रतेछंदोगाएतमस्यामेतंदिव्येतंवायावेतमाकाशेएतमप्स्वेतमोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वेतंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतेसएषसंवत्सरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंपरस्मैशंसति ॥९॥ दुग्धदोहाअस्यवेदाभवंतिनतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमितितदप्येतदृषिणोक्तंयस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभागोअस्ति ॥ यदीशृणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यलंकंशृणोतिनहिप्रवेदंसुकृतस्यपंथामितिनतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानामित्येतत्तदुक्तंभवतितस्मादेवंवि
द्वान्नपरस्माअग्निंचिनुयान्नपरस्मैमहाव्रतेनस्तुवीतनपरस्माएतदहःशंसेत्कामंपित्रेवाचार्यायवाशंसेदात्मनएवास्यत
त्कृतंभवतिसयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यंएकमेतदित्यवोचामतौयत्रविहीयेतेचंद्रमाइवादित्योदृश्यतेनर
श्मयःप्रादुर्भवंतिलोहिनीद्यौर्भवतियथामंजिष्ठाव्यस्तःपायुःकाककुलायगंधिकंमस्यशिरोवायतिसंपरेतोस्यात्मानंचिर
मिवजीविष्यतीतिविद्यात्सयत्करणीयंमन्येततत्कुर्वीतयदंतियच्चदूरकइतिसप्तजपेदादित्यप्लस्यरेतसइत्येकायत्रब्रह्मा
पवमानेतिषळुद्वयंतमसस्परीत्येकाथापियत्रच्छिद्रइवादित्योदृश्यतेरथनाभिरिवाभिख्यायेतच्छिद्रांवाछायांपश्येत्तद
प्येवमेवविद्यादथाप्यादर्शेवोदकेवाजिह्मशिरसंवाशिरसंवात्मानंपश्येद्विपर्यस्तेवाकन्याकेजिह्मेनवादृश्येयातांतदप्ये
वमेवविद्यादथा[1]'प्य'पिधायाक्षिणीउपेक्षेततद्यथाबटरकाणिसंपतंतीवदृश्यंतेतानियदानपश्येत्तदप्येवमेवविद्यादथा
प्यपिधायकर्णावुपशृणुयात्सएषोग्नेरिवप्रज्वलतोरथस्येवोपब्दिस्तंयदानशृणुयात्तदप्येवमेवविद्यादथापियत्रनीलइ
वाग्निर्दृश्यतेयथामयूरग्रीवामेघेवाविद्युतंपश्येन्मेघेवाविद्युतंनपश्येन्महामेघेवामरीचीरिवपश्येततदप्येवमेवविद्याद
थापियत्रभूमिंज्वलंतीमिवपश्येततदप्येवमेवविद्यादितिप्रत्यक्षदर्शनान्यथस्वप्नाःपुरुषंकृष्णंकृष्णदंतंपश्यतिसएनंहं

१ दथापिधायेतिभाष्यपाठः ।

तिवराहएनंहंतिमर्कटएनमास्कंदयत्याशुवायुरेनंप्रवहतिसुवर्णखादित्वापगिरतिमध्वश्नातिबिसानिभक्षयत्येकपुंडरी
कंधारयतिखरैर्वराहैर्युक्तैर्यातिकृष्णांधेनुंकृष्णवत्सांनलदमालीदक्षिणामुखोव्राजयतिसयद्येतेषांकिंचित्पश्येदुपोष्य
पायसंस्थालीपाकंश्रपयित्वारात्रीसूक्तेनप्रत्यृचंहुत्वान्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयात्सयोतोश्रुतोगतो
मतोनतोदृष्टोविज्ञातोनादिष्टःश्रोतामंताद्रष्टादेष्टाघोष्टाविज्ञाताप्रज्ञातासर्वेषांभूतानामंतरपुरुषःसमआत्मेतिविद्यात्
॥१०॥ अथखल्वियंसर्वस्यैवाचउपनिषत्सर्वाह्येवेमाःसर्वस्यैवाचउपनिषदइमांत्वेवाचक्षतेपृथिव्यारूपंस्पर्शोंअंतरिक्ष
स्योष्माणोदिवःस्वरांअग्नेरूपंस्पर्शावायोरूष्माणआदित्यस्यस्वरांऋग्वेदस्यरूपंस्पर्शोयजुर्वेदस्योष्माणंःसामवेदस्यस्व
रांश्चक्षुषोरूपंस्पर्शोंःश्रोत्रस्योष्माणोंमनसःस्वरांःप्राणस्यरूपंस्पर्शोंअपानस्योष्माणोंव्यानस्यस्वरांअथखल्वियंदैवीवी
णाभवतितदनुकृतिरसौमानुषीवीणाभवतियथास्याःशिरएवममुष्याःशिरोंयथास्याउदरमेवममुष्याअंभणंयथास्यैजि
ह्वैवममुष्यैवादनंयथास्यास्तंत्रयएवममुष्याअंगुलयोंयथास्याःस्वराएवममुष्याःस्वरांयथास्याःस्पर्शाएवममुष्याःस्प
र्शोंयथाह्येवेयंशब्दवतीतर्ह्यवंत्येवमसौशब्दवतीतर्ह्यवतींयथाह्येवेयंलोमशेनचर्मणापिहिताभवंत्येवमसौलोमशेनचर्म
णापिहितालोमशेनहस्मवैचर्मणापुरावीणाअपिदधतिसयोहैतांदैवींवीणांवेदश्रुतवदनोभवतिभूमिप्रास्यकीर्तिर्भवतिं
यत्रक्वचार्यावाचोभाषंतेविदुरेनंतत्रोथातोवाग्रसोंयस्यांसंसद्यधीयानोवाभाषमाणोवानविरुरुचुषेततत्रैतामृचंजपेदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टापिधानानकुलीदंतैःपरिवृतापविः ॥ सर्वस्यैवाचईशानाचारुमामिहवादयेदितिवाग्रसः ॥११॥ अथहास्माएतत्कृ
ष्णहारितोवाग्ब्राह्मणमिवोपोदाहरतिप्रजापतिःप्रजाःसृष्ट्वाव्यस्रंसतसंवत्सरंःसच्छंदोभिरात्मानंसमदधाद्यच्छंदोभि
रात्मानंसमदधात्तस्मात्संहिताऽतस्यैवाएतस्यैसंहितायैणकारोबलंषकारःप्राणआत्मासयोहैतौणकारषकारावनुसंहित
मृचोवेदंसबलांसप्राणांसंहितांवेदायुष्यमितिविद्यात्सयदिविचिकित्सेत्सणकारंब्रवाणीꣳ ॥ अणकाराꣳ ॥ इति ॥
सणकारमेवब्रूयात्सषकारंब्रवाणीꣳ ॥ अषकाराꣳइति ॥ सषकारमेवब्रूयात्तेयद्वयमनुसंहितमृचोधीमहेयच्चमांडूकेयी
यमध्यायंप्रब्रूमस्तेननोणकारषकारांउपासावितिहस्माहह्रस्वोमांडूकेयोथयद्वयमनुसंहितमृचोधीमहेयच्चमांडूकेयीय
मध्यायंप्रब्रूमस्तेननोणकारषकारांउपासावितिहस्माहस्थविरःशाकल्यंएतद्वस्मवैतद्विद्वांसआहुर्ऋषयःकावषेयाःकिम
र्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामहेवाचिहिप्राणंजुहुमःप्राणेवावाचैयोह्येवप्रभवःसएवाप्ययस्ताएताःसंहिताना
नंतेवासिनेप्रब्रूयान्नासंवत्सरवासिनेनाप्रवक्रइत्याचार्याआचार्याः ॥१२॥ इत्यैतरेयतृतीयारण्यकेद्वितीयोऽध्यायः ॥
॥ २ ॥ ॥ इतितृतीयारण्यकंसमाप्तं ॥ ॥ ॥
ॐ३म् ॥ विदामघवन्विदागातुमनुशंसिषोदिशः ॥ शिक्षाशचीनांपतेपूर्वीणांपुरूवसो ॥ आभिष्ट्वमभिष्टिभिःप्रचेत

१ कारावुपासाविति भाष्यपाठः ।

नप्रचेतय ॥ इंद्रद्युम्नायनइषएवाहिशक्रः ॥ रायेवाजायवज्रिवंःशविष्ठवज्रिन्नृंजसे ॥ मंहिष्ठवज्रिन्नृंजसआयाहिपि
बमत्स्व ॥ विदारायःसुवीर्यंभुवोवाजानांपतिर्वशाँऽअनु ॥ मंहिष्ठवज्रिन्नृंजसेयःशविष्ठःशूराणां ॥ योमंहिष्ठोमघोनां
चिकित्वोअभिनोनय ॥ इंद्रोविदेतमुस्तुषेवशीहिशक्रः ॥ तमूतयेहवामहेजेतारमपराजितं ॥ सनःपर्षदतिद्विषःक
तुश्छंदऋतंबृहत् ॥ इंद्रंधनस्यसातयेहवामहेजेतारमपराजितं ॥ सनःपर्षदतिद्विषःसनःपर्षदतिस्रिधः ॥ पूर्वस्ययत्ते
अद्रिवंःसुम्नआधेहिनोवसो ॥ पूर्तिःशविष्ठशस्यतईशेहिशक्रः ॥ नूनंतंनव्यंसन्यसेप्रभोजनस्यवृत्रहन् ॥ समन्येषुब्र
वावहैशूरोयोगोषुगच्छतिसखासुशेवोअद्वयाः ॥ एवाह्येवैवाह्यग्नाऽइ ॥ एवाह्येवैवाहींऽद्रं ॥ एवाह्येवैवाहिविष्णा
ऽउ ॥ एवाह्येवैवाहिपूषऽन् ॥ एवाह्येवैवाहिदेवाऽः ॥ एवाहिशक्रोवशीहिशक्रोवशाँऽअनु ॥ आयोमन्यायमन्यवं
उपोमन्यायमन्यवे ॥ उपेहिविश्वध ॥ विदामघवन्विदोऽम् ॥ १ ॥ इत्यैतरेयचतुर्थारण्यकेप्रथमोऽध्यायः ॥ १ ॥
॥ इत्यैतरेयकेचतुर्थारण्यकंसमाप्तं ॥ ॥ ॥
ॐ३म् ॥ महाव्रतस्यपंचविंशतिंसामिधेन्यंएकविंशतौप्रागुपोत्तमायाःसमिधाग्निमितिचतस्रोवैश्वकर्मणऋषभंउपालं
भनीयउपांश्वाज्यप्रउगैविश्वजितोहोत्राश्चतुर्विंशादींखयंतीरपस्युवइतिचब्राह्मणाच्छंस्यावपेतप्रातःसवनेतीव्रस्याभिव
यसोअस्यपाहीतिमाध्यंदिनेत्रिकद्रुकेषुमहिषोयवाशिरमितिस्तोत्रियंएंद्रयाह्युपनःपरावतंइंद्रायहिद्यौरसुरोअनम्नत ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोष्वस्मैपुरोरथमित्यतोनुरूपश्चतुर्विंशान्मरुत्वतीयस्यातानोऽसत्सुमेजरितःसाभिवेगःपिबासोममभियमुग्रतर्दःकया शुभासवयसःसनीळामरुत्वाँइंद्रवृषभोरणाय॥ जनिष्ठाउग्रःसहसेतुरायेतिमरुत्वतीयंसंस्थितेमरुत्वतीयेहोताविसंस्थितःसंचरेणनिष्क्रम्याग्नीध्रीयेतिस्रुआज्याहुतीर्जुहोत्यौदुंबरेणस्रुवेणानुमामिंद्रोअनुमांबृहस्पतिरनुसोमोअनुवाग्देव्यावीत् ॥ अनुमांमित्रावरुणाविहावतामनुद्यावापृथिवीपूर्वहूतौ ॥ आदित्यामाविश्वेअवंतुदेवाःसप्तराजानोयऽउदाभिषिक्ताः॥ वायुःपूषावरुणःसोमोअग्निःसूर्योनक्षत्रैरवत्विहमानु ॥ पितरोमाविश्वमिदंचभूतंपृश्निमातरोमरुतःस्वर्काः॥ येअग्निजिह्वाउतवायजत्रास्तेनोदेवाःसुहवाःशर्मयच्छतेतिदक्षिणेमार्जालीयेदर्शस्रुच्युत्तमांचतुर्गृहीतंपूर्वमवदायोत्तरतोग्नेरुपनिधायविहरणप्रभृतिमध्यंदिनेमार्जालीयोजागरितोभवतितस्मिन्परिवृतेजुहोतिप्राग्द्वारेवोदग्द्वारेवाप्रागुदग्द्वारेवाग्निरिवानाधृष्यःपृथिवीवसुषदाभूयासमंतरिक्षमिवानाप्यंद्यौरिवानाधृष्योभूयासंसूर्यइवाप्रतिधृष्यश्चंद्रमाइवपुनर्भूर्भूयासंमनइवापूर्वीवायुरिवश्लोकभूर्भूयासमहरिवस्वंरात्रिरिवप्रियोभूयासंगावइवपुनर्भुवोमिथुनमिवमरीचयोभूयासमापइवरसओषधयइवरूपंभूयासमन्नमिववि भुयज्ञइवप्रभूर्भूयासंब्रह्मेवलोकेक्षत्रमिवश्रियांभूयासंयदग्नएषासमितिर्भवातीत्यत्रविभजाथवीथेतित्रीण्यनन्वृचमंत्रतिष्ठन्नादित्यमुपतिष्ठतेपर्यावृत्तेप्रदक्षिणमावृत्यैतैश्चैवास्वाहाकारैरेह्येवा३इदंमधू३इदंमधु ॥ इमंतीव्रसुतंपिबा३ ॥ इदंमधू३इदंमध्वितिचप्रेष्याःसंशास्तिपूर्णकुंभास्तिस्रोव

मांषळुत्तमांइमंधिष्ण्यमुदकुंभंचत्रिःप्रदक्षिणंपरिव्रजाथदक्षिणैःपाणिभिर्दक्षिणानूरूनाघ्नानाएह्येवा३इदंमधू३इदंमध्वितिवदत्यः ॥ १ ॥ उपाकृतेस्तोत्रेत्रैधंनिनयेथात्रोत्तरेचमार्जालीयेशेषमंतर्वे'दीति'प्रदक्षिणमग्निंनिष्क्रम्याग्रेणयूपंपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्नग्नेःशिरउपतिष्ठतेनमस्तेगायत्रायय त्तेशिरइतितेनैवयथेतंप्रत्येत्यदक्षिणमुदङ्मुखःपक्षंनमस्तेराथंतरायंयस्तेदक्षिणःपक्षइत्यपरेणाग्निपुच्छमतिक्रम्यप्राङ्मुखउत्तरेनमस्तेबृहतेयस्तउत्तरःपक्षइतिपश्चात्प्राङ्पुच्छंनमस्तेभद्रायंयत्तेपुच्छंयातेप्रतिष्ठेतिदक्षिणतःपुच्छस्यात्मानंनमस्तेराजनाययस्तआत्मेति ॥ २ ॥ यथेतंसदःप्रसर्पतिपुरस्तात्प्रेंखउपकॢप्तोभवतिस्थूणेरज्जूवीवधइत्येतत्प्रक्षाल्यतीर्थेनप्रपाद्योत्तरेणाग्नीध्रीयंपरिव्रज्यपूर्वयाद्वारासदःसर्वान्धिष्ण्यानुत्तरेणौदुंबराणिकाष्ठानिप्रेंखस्यभवंतिपालाशानिमिश्राणिवात्रीणिफलकान्युभयतस्तष्टानिद्वेवासूच्यश्चतावत्यइषुमात्रःप्राङ्प्रेङ्खोनिमुष्टिकस्तिर्यङुदगग्रःप्रागग्राभ्यांसूचीभ्यांसमुतोदक्षिणोत्तरेस्थूणेनिखायांभितोहोतृषदनंवीवधमत्यादधात्यास्यसंमितंकर्तुःकुष्ठासुच्छिद्राणिप्रेंखस्यभवंतिरज्जूभ्यामूर्ध्वमुद्वयतिदक्षिणतोदक्षिणयोत्तरतःसव्ययादाभ्यांत्रिगुणेस्यातांसव्यदक्षिणेपंचव्यायामेद्विगुणेवीवधेत्रिःप्रदक्षिणंपर्यस्योर्ध्वग्रांथिंनिष्टर्क्यबध्नातिशाखाभिर्बृसीभिर्वापर्यृषंत्यप्रकंपिचतुरंगुलेनैषविभूमःप्रेंखःस्यान्मुष्टिमात्रेणवादक्षिणतउदाहिततरःसमोवापदमात्रेधिष्ण्यात्॥३॥

१ वेदिप्रदक्षिणमितिभाष्येपाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठितेप्रेंखेहोतावाणमौदुंबरंशततंतुमुभाभ्यांपरिगृह्योत्तरतउपोहतैंयथावीणांसप्तभिश्छंदोभिश्चतुरुत्तरैः स्थानान्य
स्योर्ध्वमुद्गृह्णीयादृशभिर्वागायत्रेणत्वाछंदसोदूहाम्यौष्णिहेनत्वानुष्टुभेनत्वाबार्हतेनत्वापांक्तेनत्वात्रैष्टुभेनत्वाजागते
नत्वावैराजेनत्वाद्विपदेनत्वातिच्छंदसात्वेतिछंदांस्यनुक्रम्यस्थानानामनुपरिक्रमणमौदुंबर्यार्द्रयाशाखयासपलाशया
मूलदेशेनवाणंत्रिरूर्ध्वमुल्लिखतिप्राणायत्वापानायत्वाव्यानायत्वोल्लिखामीत्यन्येभ्योपिकामेभ्यःपुनरपिनतूल्लिखामी
तिब्रूयादथैनंसशाखंछंदोगेभ्यःप्रयच्छतिभूतेभ्यस्त्वेतिपश्चार्धेफलकेपाणीप्रतिष्ठापयतिप्राणमनुप्रेंखस्वेतिप्रांचंप्रेंखंप्र
णयतिव्यानमन्वींखस्वेतितिर्यंचमपानमन्वींखस्वेत्यभ्यात्मंभूर्भुवःस्वरितिजपतिप्राणायत्वेतिप्रांचमेवव्यानायत्वेति
तिर्यंचमपानायत्वेत्यभ्यात्मंवसवस्त्वागायत्रेणछंदसारोहंतुतानन्वारोहामीतिपश्चार्धेफलकेरत्नीप्रतिष्ठापयत्यथपूर्वफ
लकैनानापाणिभ्यामभिपद्येतयथाहिस्रप्स्यन्मध्यमंछुबुकेनोपस्पृशेद्वयोर्वासंधौरुद्रास्त्वात्रैष्टुभेनच्छंदसारोहंतुतान
न्वारोहामीतिदक्षिणंसक्थ्यतिहरत्यादित्यास्त्वाजागतेनच्छंदसारोहंतुतानन्वारोहामीतिसव्यंविश्वेत्वादेवाआनुष्टुभे
नच्छंदसारोहंतुतानन्वारोहामीतिसमारोहतिपश्चात्स्वस्यधिष्ण्यस्यदक्षिणंपादंप्रांचंप्रतिष्ठापयत्यथसव्यंयदेतरःश्रा
म्येदथेतरंयदेतरोथेतरंनोभौविभूमौकुर्यात्कूर्चान्होत्रकाःसमारोहंतिब्रह्माचौदुंबरीमासंदीमुद्गातायदिकस्मैचिदवश्य
कर्मिणोजिगमिषेदादिश्यपालंप्राङ्वरुह्यचरित्वातमर्थमेवमेवाऽजपयावृतारोहेत् ॥ ४ ॥ प्रस्तोतारंसंशास्तिपंचविंश

स्यस्तोमस्यतिसृष्वर्धतृतीयास्वर्धत्रयोदशासुवापरिशिष्टासुप्रथमंप्रतिहारंप्रब्रूतादित्यर्धत्रयोदशासुप्रवाचयतेतिजातू
कर्ण्यःप्रोक्तेजपतिसुपर्णोसिगरुत्मान्प्रेमांवाचंवदिष्यामिबहुवदिष्यंतींबहुपतिष्यंतींबहुकरिष्यंतींबहुसनिष्यंतींब्रहो
भूयःकरिष्यंतींस्वर्गच्छंतींस्वर्वदिष्यंतींस्वःपतिष्यंतींस्वःकरिष्यंतींस्वःसनिष्यंतींस्वरिमंयज्ञंवक्ष्यंतींस्वर्मायजमानंव
क्ष्यंतीमितिदीक्षितेयजमानशब्दोनादीक्षितेस्वरमुमितियोस्यप्रियःस्यान्नतुवक्ष्यंतीमितिब्रूयादुक्थवीर्याणिचसंप्राणो
वाचासमहंवाचासंचक्षुर्मनसासमहंमनसासंश्रोत्रमात्मनासमहमात्मनामयिमहान्मयिभगोमयिभगोमयिभुजोमयि
स्तोभोमयिस्तोमोमयिश्लोकोमयिघोषोमयियशोमयिश्रीर्मयिकीर्तिर्मयिभुक्तिरित्याहूयवागितिजपतित्रयआहावाःश
स्त्रादेर्निविदःपरिधानीयायाइतिशब्दानध्वर्यवःकारयंत्येतस्मिन्नहनिप्रभूतमन्नंदद्याद्राजपुत्रेणचर्मव्याधयंत्याघ्नंतिभू
मिदुंदुभिंपद्यश्चकांडवीणाभूतानांचमैथुनैब्रह्मचारिपुंश्चल्योःसंप्रवादोऽनेकेनसान्नानिष्केवल्यायस्तुवतेराजनस्तो
त्रियेणप्रतिपद्यते ॥ ५ ॥ तदिदासभुवनेषुज्येष्ठंतांसुतेकीर्तिंमघवन्महित्वाभूयइद्धावृधेवीर्यायनृणामुत्वानृतमंगी
भिरुक्थैरितितिस्रोत्रहैकेस्वादोःस्वादीयःस्वादुनासृजासमदःसुमधुमधुनाभियोधीरित्यात्मनएतेपदेउद्धृत्यपक्षपदेप्र
त्यवदधात्यश्वायंतोमघवन्निंद्रवाजिनोगामश्वंरथ्यमिंद्रसंकिरेत्येतयोश्चस्थानइतरेश्रियमहगोरश्वमात्मन्धत्तेसंपक्षयोः
पतनायनदंवओदतीनामित्येतयैतानिव्यतिषजतिपादैःपादान्बृहतीकारैनदवंत्युत्तराणिप्रथमायांचपुरुषाक्षराण्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदधातिंपादेष्वेकैकमवसानेतृतीयवर्जसखलुविहरत्यपिनिदर्शनायोदाहरिष्यामः ॥ तदिदासभुवनेषुज्येष्ठंयु ॥ नदं
वओदतीनां ॥ यतोजज्ञउग्रस्त्वेषनृम्णोरु ॥ नदंयोयुवतीनां३॥ सद्योजज्ञानोनिरिणातिशत्रूंन्पतिंवोअघ्न्यानां ॥ अ
नुयंविश्वेमदंत्यूमाःषोधेनूनामिषुध्यसोमित्येवमेतांत्रिरन्यासुचेत्समाम्नातासुराजनेनसाम्नास्तुवीरन्यथास्थानंताइहै
वेमाअसमाम्नातासुचेत्स्तुवीरंन्तसमाम्नातस्यतावतीरुद्धृत्यतत्रताःशंसेदिहोएवेमाअन्यासुचेत्प्राक्सूददोहसस्तांस्तदि
दासेत्येतदादिशस्त्रमविहृतश्चात्रप्रतिगरस्ताअस्यसूददोहसइत्येतदादिःसूददोहाःसूददोहाः ॥ ६ ॥ इत्यैतरेयपंच
मारण्यकेप्रथमोध्यायः ॥ १ ॥ ॥ ग्रीवाः३ ॥ यस्येदमारजस्तुजोयुजोवनंसहः ॥ इंद्रस्यरंत्यंबृहत् ॥ नाधृषआद
धर्षेदाधृषाणंधृषितंशवः ॥ पुरायदीमतिव्यथिरिंद्रस्यधृषितंसहः ॥ सनोददातुतंरयिंरयिंपिशंगसंदृशं ॥ इंद्रःपति
स्तवस्तमोजनेष्वासूददोहाः ॥ शिरोगायत्रमिंद्रमिद्गाथिनोबृहदित्यन्यासुचेत्समाम्नातासुस्तुवीरन्नुभयासंस्थानविप
र्ययोऽसमाम्नातासुचेत्स्तुवीरन्मिश्रासुचसूक्तस्योत्तमांसूददोहाविजवः ॥ सुतस्तेसोमउपयाहियज्ञंमत्स्वामदंपुरुवारं
मघाय ॥ मंहिष्ठइंद्रविजुरोगृणध्यै ॥ ससाहतुर्वृत्रहत्येषुशत्रूंनृभुर्विगाहएषः ॥ सनोनेतारंमहयामइंद्रं ॥ इनोवसुः
समजःपर्वतेष्ठाःप्रतिवामृजीषी ॥ इंद्रःशश्वद्भिर्जोहूत्रएवैः ॥ सूददोहाइत्येतत्रयंग्रीवाःशिरोविजवःसर्वमर्धमर्च्यं

१ ष्यामस्तदिदासइतिसंहितापाठोभाष्ये ।

॥ ७ ॥ राथंतरोदक्षिणःपक्षोऽभित्वाशूरनोनुमोऽभित्वापूर्वपीतयइतिरथंतरस्यस्तोत्रियानुरूपौप्रगाथौचतस्रःस
तीःषड्बृहतीःकरोतींद्रस्यनुवीर्याणिप्रवोचंत्वेहयत्पितरश्चिन्नइंद्रेतिपंचदशंयस्तिग्मशृंगोवृषभोनभीमउग्रोजज्ञेवीर्या
यस्वधावानुदुब्रह्माण्यैरतश्रवस्यातेमहइंद्रोत्युग्रेतिपंचसूक्तान्यानइंद्रोदूरादानआसादितिसंपातइत्थाहिसोमइन्मद
इतिपंक्तिःसूददोहावार्हतउत्तरस्त्वामिद्धिहवामहेत्वंह्यहिचेरवइतिबृहतःस्तोत्रियानुरूपौप्रगाथौचतस्रःसतीःषड्बृह
तीःकरोतिंतमुष्टुहियोअभिभूत्योजाःसुतइत्त्वंनिमिश्लइंद्रसोमइतित्रीण्यभूरेकोरयिपतेरयीणामित्यष्टौसूक्तानिकथा
महामवृधत्कस्यहोतुरितिसंपातइंद्रोमदायवावृधइतिपंक्तिःसूददोहाराथंतरोदक्षिणःपक्षःपंचदशःस्तोमएकशतंवसि
ष्ठप्रासाहौवार्हतउत्तरःसप्तदशःस्तोमोद्विशतंभरद्वाजप्रासाहौभद्रंपुच्छंद्विपदास्त्विमानुकंभुवनासीषधामायाहिवनसा
सहेतिंनवसमाम्नाताअथासमाम्नाताःप्रवइंद्रायवृत्रहंतमायविप्रागाथंगायतयज्जुजोषत् ॥ अर्चत्यर्कंदेवतास्वर्कीआस्तो
भतिश्रुतोयुवासइंद्रः ॥ उपप्रक्षेमधुमतिक्षियंतःपुष्यंतोरयिंधीमहेतमिंद्र ॥ विश्वतोदावन्विश्वतोनआभरयंत्वाश
विष्ठमीमहे ॥ ससुप्रणीतेनृतमःस्वराळसिमंहिष्ठोवाजसातये ॥ त्वंह्येकईशिषेसनादमृक्तओजसा ॥ विश्वस्यप्रस्तोभवि
द्वान्पुरावायदिवेहासनूनं ॥ इषंनोमित्रावरुणाकर्तनेळांपीवरीमिषंकृणुहीनइंद्र ॥ शंपदंमघंरयिषणिनसोमोअव्रतंहिनो
तिनस्पृशद्रयिः ॥ एषब्रह्मेतितिस्रआधूर्ष्वस्माइत्येकासूददोहायद्वावानेतिधाय्यासूददोहाः ॥८॥ गायत्रीतृचाशीतिर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हाँइंद्रोयओजसेतितिस्रउत्तमाउद्धरतिपुरोळाशंनोअंधसइतितिस्रइंद्रइत्सोमपाएकइत्येतत्प्रभृतीनांतिस्रउत्तमाउद्धरतितासांस्वादवःसोमाआयाहीत्येतामुद्धृत्यनह्यन्यंबळाकरमित्येतांप्रत्यवदधातिजज्ञानोनुशतक्रतुरित्येकांपुरुहूतंपुरुष्टुतमितिशेषउद्धेदभिश्रुतामघमित्युत्तमामुद्धरतिप्रकृतान्यृजीषिणंआघायेअग्निमिंधतंआतूनइंद्रक्षुमंतमितिसूक्तेसूददोहाः ॥ ९ ॥ बार्हतीतृचाशीतिर्मांचिदन्यद्विशंसतेत्येकयानत्रिंशत्पित्रासुतस्यरसिनइतिविंशतेःसप्तमींचाष्टमींचोद्धरतियदिंद्रप्रागपागुदगितिचतुर्दशवयंघत्वासुतावंतइतिपंचदशमोषुत्वावाघतश्चनेत्येतस्यद्विपदांचोद्धरतिराथंतरंचप्रगाथंमथहास्यनकिःसुदासोरथमित्येतंप्रगाथमुद्धृत्यत्वामिदाह्योनरइत्येतंप्रगाथंप्रत्यवदधात्यभिप्रवःसुराधसमितिषड्वालखिल्यानांसूक्तानियःसत्राहाविचर्षणिरितिशेषोऽयंतेअस्तुहर्यतइतिसूक्तेउभयंशृणवच्चनइतिसप्तमींचाष्टमींचोद्धरतितरोभिर्वोविदद्वसुमित्युत्तमामुद्धरतियोराजाचर्षणीनामित्येकादशंतंवोदस्ममृतीषहमानोविश्वासुहव्योयाइंद्रभुजआभरइतिनवसूददोहाः ॥ १० ॥ औष्णिहीतृचाशीतिर्यइंद्रसोमपातमइतिसूक्तेतम्वभिप्रगायतेत्युत्तमामुद्धरतीद्रायसामगायतंसखायआशिषामहीतितिस्रउत्तमाउद्धरतियएकइद्विदयतंआयाह्यद्रिभिःसुतंयस्यत्यच्छंवरंमदइतित्रयस्तृचागायत्र्यःसंपदोष्णिहःसप्तसप्तगायत्र्यःषट्षळुष्णिहोभवंतियदिंद्राहंयथात्वंप्रसम्राजंचर्षणीनामितिसूक्तेउत्तरस्योत्तमेउद्धरतिवार्त्रहत्यायशवसइत्युत्तमामुद्धरतिसुरूपकृत्नुमूतयइतित्रीण्येंद्रसानसिंरयिमि

तिसूक्तेयआनयत्परावतइतितिस्रउत्तमाउद्धरतिरेवतीर्नःसधमादइतितिस्रःसूददोहाइत्येतास्तिस्रस्तृचाशीतयःसर्वाअर्धर्च्याअन्नमशीतयउदरंवशस्त्वावतःपुरूवसवितिवशःसनितःसुसनितरित्येतदंतोददीरेक्णइतिद्विपदानूनमथेत्येकपदाताअस्यसूददोहसइत्येतदंतःसूददोहाःसूददोहाः ॥११॥ इत्यैतरेयपंचमारण्यकेद्वितीयोध्यायः॥२॥ ॥ ऊरू॥

इंद्राग्नीयुवंसुनइत्येतस्यार्धर्चान्गायत्रीकारमुत्तरमुत्तरस्यानुष्टुप्कारंप्रागुत्तमायाःप्रवोमहेमंदमानायांधसइतिनिविद्धानैवनेनवायोन्यधायिचार्कन्योजातएवप्रथमोमनस्वानितितेअंतरेणायाह्यर्वाङुपवंधुरेष्ठाविधुंदद्राणंसमनेबहूनामित्येतदावपनंदशतीनामैंद्रीणांत्रिष्टुजगतीनांबृहतीसंपन्नानांयावतीरावपेरंस्तावंत्यूर्ध्वमायुषोवर्षाणिजिजीविषेत्संवत्सरात्संवत्सरादशतोनवात्यमूषुवाजिनंदेवजूतमिंद्रोविश्वंविराजतीत्येकपदैंद्रंविश्वाअवीवृधन्नित्यानुष्टुभंतस्यप्रथमायाःपूर्वमर्धर्चंशस्त्वोत्तरेणार्धर्चेनोत्तरस्याःपूर्वमर्धर्चंव्यतिषजतिपादैःपादाननुष्टुप्कारंप्रागुत्तमायाःपूर्वस्मात्पूर्वस्मादर्धर्चादुत्तरमुत्तरमर्धर्चंव्यतिषजतिप्रकृत्याशेषःपिबासोममिंद्रमंदतुत्वेतिषड्योनिष्टइंद्रसदनेअकारीत्येतस्यचतस्रःशस्त्वोत्तमामुपसंतत्यौपोत्तमयापरिदधातिपरिहितउक्थउक्थसंपदंजपत्युक्थवीर्यस्यस्थानउक्थदोहः ॥१२॥ मूर्धालोकानामसिवाचोरसस्तेजःप्राणस्यायतनंमनसःसंवेशश्चक्षुषःसंभवःश्रोत्रस्यप्रतिष्ठाहृदयस्यसर्वं॥इंद्रःकर्माक्षितममृतंव्योम ॥ ऋतंसत्यंविजिग्यानंविवाचनमंतोवाचोविभुःसर्वस्मादुत्तरंज्योतिरूधरप्रतिवादःपूर्वसर्ववाक्परागर्वाक्सप्रुसलिलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनुपिन्वति ॥ चक्षुःश्रोत्रंप्राणःसत्यसंमितंवाक्प्रभूतंमनसोविभूतंहृदयोग्रंब्राह्मणभर्तृमंन्नशुभेवर्षपवित्रंगोभगंपृथिव्युपरंवरुणवंय्वितमंतपस्तन्विंवद्रज्येष्ठंसहस्रधारमयुताक्षरममृतंदुहानं ॥ एतास्तउक्थभूतयंएतावाचोविभूतयः ॥ ताभिर्मइहधुक्ष्वामृतस्यश्रियंमहीं ॥ प्रजापतिरिदंब्रह्मवेदानांससृजेरसं ॥ तेनाहंविश्वमाप्यासँसर्वान्कामान्दुहांमहत् ॥ भूर्भुवःस्वस्त्रयोवेदोसि ॥ ब्रह्मप्रजांमेधुक्ष्व ॥ आयुःप्राणंमेधुक्ष्व ॥ पशून्त्रिशंमेधुक्ष्व ॥ श्रियंयशोमेधुक्ष्व ॥ लोकंब्रह्मवर्चसमभयँयज्ञसमृद्धिंमेधुक्ष्वेतिंवाचयत्यध्वर्युंमबुद्धंचेदस्यभवत्योंमुक्थशायजसोमस्येतींज्यायैसंप्रेषितोंयेऽयजामहइत्यागूर्यैनित्ययैवयजतिंव्यवान्येवानुवषट्कारोंत्युक्तंवषट्कारानुमंत्रणंमाहरत्यध्वर्युंरुक्थपात्रमतिग्राह्यांश्चमसांश्चंभक्षंप्रतिख्यायंहोताप्राङ्प्रेंखादवरोहरत्यंथैतंप्रेंखंप्रत्यंचमवबध्नांतियथाशंसितारंभक्षयिष्यंतैंनोपहनिष्यसीतिंप्रेंखस्यह्यायतैंनआसीनोहोताभक्षयंत्यथैतदुक्थपात्रैंहोतोपसृष्टेनजपेनभक्षयति ॥ वाग्देवीसोमस्यतृप्यतु ॥ सोमोमेराजायुःप्राणायवर्षतु ॥ समेप्राणःसर्वमायुर्दुहांमैंहदितियुत्तमादाभिप्लविकांत्तृतीयसवनमन्यद्वैश्वदेवान्निविद्धानांदस्यवामस्यपलितस्यहोतुरितिंसलिलस्यदैर्घतमसंएकचत्वारिंशतंमानोभद्रीयंचतस्यस्थानंऐकाहिकौवैश्वदेवस्यंप्रतिपदनुचरौंच्यवेतचेद्यज्ञायज्ञीयंमग्नेतवश्रवोवयइतिंषट्स्तोत्रियानुरूपौंयदीळान्दंभूयसीषुचेत्स्तुवीरन्नाग्निंनस्वृक्तिभिरितिंतावतीर

१ वाग्वितेति क्वचित्पाठः । २ तनमासीनइतिभाष्यपाठः । ३ महदुत्तमादितिभाष्यपाठः ।

नुरूपंःसंपन्नंमहाव्रतंसंतिष्ठतंइदमहरग्निष्टोमोंयथाकालमवभृथँप्रेंखंहरेयुःसंदहेयुर्बृसीः ॥ १३ ॥ (कुशासनानि विसर्जयेत्) ॥ नादीक्षितोमहाव्रतंशंसेन्नानग्नौनपरस्मैंनासंवत्सरइत्येकेंकामंपित्रेवाचार्यायवाशंसेंदात्मनोहैवास्यतच्छस्तंभवतिंहोतृशस्त्रेषूक्थशायजंसोमस्येत्येकप्रैषंःसनाराशंसेष्वनाराशंसेषुवाहोत्रकाणा'मुक्थंशायजसोमानामिति' तदिदमहर्नानंतेवासिनेप्रब्रूयान्नासंवत्सरवासिनेंनोएवासंवत्सरवासिनेंनाब्रह्मचारिणेंनासब्रह्मचारिणेंनोएवासब्रह्मचारिणेंनानभिप्राप्तायैतंदेशंनभूयंःसकृद्ददनाद्विर्गदनाद्वाद्व्य्येवंएकएकस्मैप्रब्रूयादितिहस्माहजातूकर्ण्योंनवत्सेचनतृतीयइतिंनतिष्ठंस्तिष्ठतेनव्रजन्व्रजतेंनशयानःशयानायंनोपर्यासीनउपर्यासीनायाधएवासीनोधआसीनायंनावष्टब्धोनप्रतिस्तब्धोंनातिवीतोनांकंकृत्वोर्ध्वजुंरनपश्रितोधीयीतंनमांसंभुक्त्वानलोहितंदृष्ट्वानगतासुंनाव्रत्यमाक्रम्यंनाङ्त्वानाभ्यज्यंनोन्मर्दनंकारयित्वांननापितेनकारयित्वांनस्नात्वानवर्णकेनानुलिप्यनस्रजमपिनह्यंनस्त्रियमुपगम्यंनोल्लिख्यनावलिख्यंनेदमेकस्मिन्नहनिसमापयेंदितिहस्माहजातूकर्ण्यंःसमापयेदितिगालवोंयदन्यत्प्राक्तृचाशीतिभ्यंःसमापयेदेवेत्याग्निवेश्यायनोंन्यमन्यस्मिन्देशेंशमयमानइतियत्रेदमधीयीतंनतत्रान्यदधीयीतंयत्रत्वन्यदधीयीतंकाममिदंतत्राधीयीतंनेदमनधीयन्स्नातकोभवतिंयद्यप्यन्यद्धह्यधीयांन्नैवेदमनधीयन्स्नातकोभवतिंनास्मादधीतात्समाद्येंद्यद्य

१ अत्रचिह्नांतर्गतोभागोनभाष्यकृदिष्टः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यन्यस्मात्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नोएवास्मात्प्रमाद्येदस्माच्चेन्नप्रमाद्येदलमात्मनइतिविद्यादलंसत्यंविद्यान्नेदंविदनिदं विदासमुद्दिशेन्नसहभुंजीतनसधमादीस्यादथातःस्वाध्यायधर्मव्याख्यास्यामउपपुराणेनापीतैकक्षोदकेपूर्वाह्णेनसंभि न्नासुछायास्वपराह्णेनाध्यूह्यमेघेपतौवर्षेत्रिरात्रंवैदिकेनाध्यायेनौतरियान्नास्मिन्कथांवदेतंनास्यरात्रौचनचकीर्तयिषेत्त दितिवाएतस्यमहतोभूतस्यनामभवतियोस्यैतदेवंनामवेदब्रह्मभवतिब्रह्मभवति ॥ १४ ॥ इत्यैतरेयपंचमारण्यके तृतीयोध्यायः ॥ ३ ॥ ॥ ॥ ॥

॥ इत्यैतरेयारण्यकंसंपूर्णं ॥

॥ अथांतेपुनःशांतिः ॥

ॐ उदंतःशुक्रियँदधे ॥ तमहमात्मनिंदधे ॥ अनुमामैंत्विंद्रियं ॥ मयिश्रीमयियशः ॥ सर्वैःसप्राणःसंबलः ॥ उत्तिष्ठाम्यनुमांश्रीः ॥ उत्तिष्ठत्वनुमायँतुदेवताः ॥ अदंब्धंचक्षुरिषितंमनः ॥ सूर्योज्योतिंषांश्रेष्ठोदीक्षेमामांहिंसीः ॥ तच्चक्षुर्देवहितंशुक्रमुच्चरत् ॥ पश्येंमशरदंःशतंजीवेंमशरदंःशतं ॥ त्वमंग्नेव्रतपाअंसिदेवआमर्त्येष्वा ॥ त्वंयज्ञेष्वीड्यः ॥ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासींनःसुमतिंचिकिद्धिनः ॥ यदुत्पतन्वदंसिकर्करिर्यथाबृहद्वदेमविदथेसु वीराः ॥ शतधारमुत्समक्षीयमाणंविपश्चितंपितरंवक्त्वानां ॥ मेळिंमदैतंपित्रोरुपस्थेतरोदसीपिपृतंसत्यवाचं ॥ वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावींर्मएधि ॥ वेदस्यमआणींस्थःश्रुतंमेमाप्रहासीरनेनाधीतेनाहोरात्रा न्त्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्तारंमवत्ववतुमामवतुवक्तारंमवतुवक्तारं ॥ भद्रंनोअपिवा तयमनः ॥ ॐ शांतिःशांतिःशांतिः ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥

१ म्यनुश्रीःइतिक्वचित्पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं पुस्तकं घैसासोपाव्हहरिशर्मतनुजनुषा वेदाचार्यविनायकशर्मणा
स्वीयघैसासगुरुजीवेदपाठशालाद्वारा प्रकाशितम् ।

शके १९०७, सन १९८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ऐतरेयारण्यकंसंपूर्णम् ॥

इदं पुस्तकं घैसासोपाव्हहरिशर्मतनुजनुषा वेदाचार्यविनायकशर्मणा स्वीयघैसासगुरुजीवेदपाठशालाद्वारा प्रकाशितम् । शके १९०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.08.19 14:39
,TRANSFERRED=2019/08/16 at 14:48:32
,PAGES=32
,TYPE=STD
,NAME=S0001481
,Book Name=M-729-ETREY AARANYAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection